M.A (SANSKRIT)
CBCS COURSE
P-IX, UNIT-I
NEW COURSE

D.D.C.E.
Education for All
DIRECTORATE OF DISTANCE & CONTINUING EDUCATION
UTKAL UNIVERSITY : BHUBANESWAR

# STUDY MATERIAL

# मृच्छकटिकम्

*Prepared by*
Dr. Suneli Dei

# दीर्घप्रश्नोत्तराणि

## १. मृच्छकटिककारस्य नाट्यकारशूद्रकस्य कालं कृतिश्च आलोचयत?

मृच्छकटिकप्रकरणस्य प्रकृतकर्त्ता कोऽस्तीति विषये विदुषां मध्ये मतभेदः दृश्यते । यद्यप्यस्य मृच्छकटिकस्य प्रस्तावनायां प्रणेतुः परिचयः पुरः प्रस्तुतः परिदृश्यते यत् –

द्विरदेन्द्रगतिश्चकोरनेत्रःपरिपूर्णेन्दुमुखः सुविग्रहश्च।

द्विजमुख्यतमः कविर्बभूव प्रथितः शूद्रक इत्यगाधसत्त्वः ॥ – (मृ.प्र.-३)

अपि च –

ऋग्वेदं सामवेदं गणितमथ कलां वैशिकीं हस्तिशिक्षां

ज्ञात्वा शर्वप्रसादात् व्यपगततिमिरे चक्षुषी चोपलभ्य ।

राजानं वीक्ष्य पुत्रं परमसमुदयेनाश्वमेधेन चेष्ट्वा

लब्ध्वा चायुः शताब्दं दशदिनसहितं शूद्रकोऽग्निं प्रविष्टः ॥ – (मृ.प्र.-४)

समरव्यसनी प्रमादशून्यः ककुदो वेदविदां तपोधनश्च ।

परवारणबाहुयुद्धलुब्धः क्षितिपालः किल शूद्रको बभूव ॥ – (मृ.प्र.-५)

इति । तथापि प्रस्तुतप्रस्तावनायां ''शूद्रको बभूव'', ''अग्निं प्रविष्टः''

इत्यादिलिट्प्रयोगः, अग्निप्रवेशकर्मवर्णनेन च महानत्र भ्रमः समुदेति। अतः कोऽस्य मृच्छकटिकप्रकरणस्य कर्त्ता इति विषये सन्देहः जायते । पिशेल् महोदयस्य मतेन दशकुमारचरितकारस्य दण्डिनः तृतीयकृतिस्तु मृच्छकटिकम् अस्ति । केषाञ्चित् विदुषां मतेन मृच्छकटिकं नाट्यकारभासेन रचितम् । यद्यपि मृच्छकटिकस्य एषा प्रस्तावना लिट्प्रयोगैः संशयापन्नाऽस्ति, तथापि शूद्रक एव मृच्छकटिकस्य रचयिताऽस्तीति परम्परावादिनो वदन्ति । डॉ. स्मिथ्महोदयस्य मतेन एषः मृच्छकटिककारः शिमुकःशूद्रकः, प्रो.कोनीमहोदयस्य पलोटमहोदयस्य च मतेन शिवदत्तः शूद्रकः, चन्द्रवलीपाण्डेयादीतिहासकाराणां मतेन पुलभावि शूद्रकः चास्ति ।

मृच्छकटिकस्य प्रस्तावनायां प्रस्तुतविवरणेन पूर्वोक्तविवेचनेन चातीवशक्तिसम्पन्नः क्षत्रियवंशावतंसः, वेदेषु शास्त्रेषु गणिते वैशिके चतुःषष्ठीकलासु हस्तिशिक्षायां च शिवप्रसादेन परमनिष्णातः, समरव्यसनी,प्रमादशून्यः,परवारणबाहुयुद्धलुब्धः, यशस्वी नृपो महाकविश्चायं सिद्ध्यति मृच्छकटिकस्य कर्त्ता शूद्रकः । खुण्टमोडकशब्दप्रयोगेण, सह्यपर्वते भगवत्या सह्यवासिन्या वर्णनेन ,वयं दाक्षिणात्या अव्यक्तभाषिणः इति कथनेन, एषा नाणकमोषिका इत्यत्र मोषिकाशब्दप्रयोगेण कर्णाटकलहप्रयोगेण चायं शूद्रकः दाक्षिणात्य इति साधयन्ति विद्वांसः ।

महाकवेः शूद्रकस्य कालविषयेऽधुनापि किञ्चिन्निश्चायकं प्रमाणं नोपलभ्यते। मृच्छकटिकस्य कथानकं महाकविभासकृतदरिद्रचारुदत्तकथानकमिवास्ति । बहवोऽनुपदं श्लोका अपि समुपलभ्यन्ते । वस्तुतो मृच्छकटिकं दरिद्रचारुदत्त- मेवाधारीकृत्य निर्मितमिति स्पष्टमेव प्रतीयते । अतोऽस्य रूपकस्य रचना भासादनन्तरं तत्समये वा सम्भाव्यते । भासस्य समयः ख्रीष्टपूर्वं चतुर्थशतकमस्ति।

अयं हि पातकी विप्रो न वध्यो मनुरब्रवीत्।

राष्ट्रादस्मात्तु निर्वास्यो विभवैरक्षतैः सह ॥(९,३९)

इति मृच्छकटिके मनोः स्मरणमस्ति । महर्षेःमनोः कालः ख्रीष्टपूर्वं द्वितीयशतकम् । वामनेन काव्यालङ्कारसूत्रवृत्तौ मृच्छकटिकस्योल्लेखः विहितः । वामनस्य कालः ख्रैस्तीयअष्टमशतकम्। कविदण्डिना काव्यादर्शे ''लिम्पतीव तमोऽङ्गानि ''इति उदाहृतः। अपि च तेन दशकुमारचरिते अवन्तीसुन्दरीकथायाञ्च शूद्रकः कविर्नृपश्चेति वर्णितः । दण्डिनः समयः ख्रैस्तीयसप्तमशतकम्। पञ्चतन्त्रेऽपि मृच्छकटिकस्य श्लोकाः संगृहीताः सन्ति । पञ्चतन्त्रस्य कालः ऐतिहासिकैः ख्रैस्तीयपञ्चमशतकमिति स्वीक्रियते । वस्तुतो भासस्य प्रभावो वर्त्तते सर्वथा मृच्छकटिके । अतो मनोरनन्तरं भासादनन्तरं च शूद्रकस्य समयः भवेदिति निश्चीयते । एवं मृच्छकटिकस्य शूद्रकस्य वा समयः ख्रीष्टपूर्वद्वितीयशतकतः ख्रैस्तीयपञ्चमशतकं यावत् भवितुमर्हति ।

## २. मृच्छकटिकप्रकरणस्य कथावस्तु

### मङ्गलाचरणम् -

ग्रन्थस्य निर्विघ्नपरिसमाप्त्यर्थं ग्रन्थारम्भे सर्वादौ ग्रन्थकर्त्ता शूद्रकेण नान्दीश्लोकद्वयेन मङ्गलाचरणं कृतम् -

पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानो-

रन्तःप्राणावरोधव्युपरतसकलज्ञानरुद्धेन्द्रियस्य ।

आत्मान्यात्मानमेव व्यपगतकरणं पश्यतस्तत्त्वदृष्ट्या

शम्भोर्वः पातु शून्येक्षणघटितलयब्रह्मलग्नः समाधिः ॥

अर्थात् पर्यङ्कग्रन्थिबन्धद्विगुणितभुजगाश्लेषसंवीतजानोः, अन्तः प्राणावरोध-व्युपरतसकलज्ञानरुद्धेन्द्रियस्य, आत्मनि तत्त्वदृष्ट्या व्यपगतकरणं आत्मानमेव पश्यतः, शम्भोः शून्येक्षणघटितलय ब्रह्मलग्नः समाधिः वः पातु ।

पर्यङ्कनाम्ना योगासनस्य यः सन्धिस्थलः, तस्य धारणे द्विगुणतां गतः यः विषधरसर्पः, तस्य परिवेष्टनेन आबद्धं जानुद्वयं यस्य तस्य बद्धपर्यङ्कासनस्य, देहाभ्यन्तरे प्राणापानसमानादिवायूनाम् अवरोधेन निवृत्तं सम्पूर्णं वाह्यविषयकज्ञानं येषां तानि नियन्त्रितानि श्रवणादीनि इन्द्रियाणि यस्य तस्य, आत्मनि विनष्टीभूतकरणं शुद्धचैतन्यस्वरूपं परमात्मनं प्रत्यक्षीकृतस्य तस्य, भगवतः शिवस्य आकाररहितस्य दर्शनेन प्राप्तः यः लयः, तेन लयेन परंब्रह्माणि संबद्धा या समाधि-अवस्था, सा समाधि-अवस्था युष्मान् सर्वान् रक्षतु इति ।

अपि च -

पातु वो नीलकण्ठस्य कण्ठः श्यामाम्बुदोपमः ।
गौरीभुजलता यत्र विद्युल्लेखेव राजते ॥

अर्थात् यत्र गौरीभुजलता विद्युल्लेखा इव राजते, सः श्यामाम्बुदोपमः नीलकण्ठस्य कण्ठः वः पातु ।

यस्मिन् कण्ठे पार्वत्याः आवेष्टनीकृता वाहुलता विद्युत्रेखा इव शोभते, तस्य नीलकण्ठस्य शङ्करस्य श्यामलवर्णः मेघः इव नीलकण्ठः युष्मान् सर्वान् रक्षतु इति ।

### प्रस्तावना -

नान्द्यन्ते कविपरिचयप्रदानादनन्तरं च दीर्घकालतः सङ्गीतस्य निरन्तराभ्यासश्रमेण बुभुक्षितः सूत्रधारः स्वगृहं गत्वा स्वादिष्टभोजनपूजादिसमारम्भं च दृष्ट्वा आश्चर्यचकितः सञ्जातः । सः तत् समारम्भकारणज्ञानार्थं स्वपत्नीं पृष्टवान् । सापि अभिरूपपतिव्रताय एतत्समारम्भस्यायोजनमिति ज्ञापितवती । पूर्वं श्रुत्वैव कुपितः सूत्रधारः पश्चाद् वस्तुस्थितिं परिज्ञाय ब्राह्मणस्य निमन्त्रणार्थं गृहान्निःसरति । उज्जयिनीवासिनः सम्पन्नतां

स्वकीयां विपन्नताञ्च विचार्य दुःखितो जातो यत्तद्गृहे भोजनार्थं कश्चित् ब्राह्मणो नागमिष्यति । अकस्मान्मैत्रेयस्तद्दृष्टिपथमागच्छति । स मैत्रेयं गृहमागत्य भोजनस्वीकारार्थं प्रार्थितवान् परन्तु सदासर्वदा चारुदत्तस्य गृहे भोजनं कुर्वाणः मैत्रेयः अन्यस्य गृहे भुङ्क्त्वा चारुदत्तस्य दारिद्र्यम् उपहसितुम् न इष्टवान् । अतः सः सूत्रधारस्य निमन्त्रणं अस्वीकारं कृतवान् । ततोऽतिदुःखितः सूत्रधारः रङ्गमञ्चे मैत्रेयस्य आगमनसूचनां प्रदाय अपरब्राह्मणस्य अन्वेषणार्थं प्रस्थितवान् ।

## प्रथमोऽङ्कः -

प्रस्तावनानन्तरं रङ्गमञ्चमधिगच्छति विदूषकः मैत्रेयः । चारुदत्तस्य प्रियमित्रेण जूर्णवृद्धेन प्रदत्तं जातीकुसुमवासितप्रावारकम् आदाय चारुदत्तमुपगच्छति । चारुदत्तः स्वगृहस्य विपन्नामवस्थामवलोक्य उपविष्टः । आगतं विदूषकं दृष्ट्वा चारुदत्तस्तस्य स्वागतं करोति । विदूषकः चारुदत्ताय प्रावारकं प्रयच्छति । चारुदत्तः विदूषकस्य समीपे स्वकीयनिर्धनतावर्णनपूर्वकं लोकस्य परिवर्त्तितस्य व्यवहारस्य वर्णनं कृत्वा दुःखितो भवति ।

अथ मार्गे विटचेटशकारादिभिः अनुगम्यमाना वसन्तसेना पलायते । ते च रतिप्रार्थनां कुर्वन्ति, परन्तु वसन्तसेना तान् तिरस्करोति । मूर्खतावशात् शकारेण चारुदत्तस्य गृहं समीपमेवास्तीति ज्ञात्वा प्रियसङ्गमाशंसया तेषामुपकृतिमेव मन्यमाना पलायन्ती गहनान्धकारे विलीना वसन्तसेना चारुदत्तस्य गृहमवाप । परन्तु तस्य द्वारं पिहितमासीत् ।

गृहदेवताभ्यो वलिप्रदानादनन्तरं चारुदत्तः विदूषकं मैत्रेय चतुष्पथे मातृदेवीभ्यो वलिं प्रदातुमादिशति । मैत्रेयः 'न गमिष्यामि' इत्युक्तोऽपि चारुदत्तस्य दारिद्र्येण दुःखभावम् असहमानो रदनिकया सह गन्तुम् उद्यतो सन् यदा कपाटद्वारम् उद्घाटयति तदा द्वारस्था वसन्तसेना पटान्तेन झटिति मैत्रेयहस्तगतं दीपं निर्वाप्य प्रविष्टा । रदनिकां वहिर्गमनाय उक्त्वा विदूषकः स्वयं प्रदीपप्रज्वालनार्थं गेहं प्रविष्टः । तदानीमेव वसन्तसेनामन्विष्यमाणः शकारो रदनिकामेव वसन्तसेनेति गृह्णाति । रदनिका प्रतिवादं करोति । ततो विदूषकोऽपि दीपं प्रज्वाल्य आगच्छति । रदनिकायाः अपमानेन विदूषकः शर्करादिभ्यः क्रूध्यति । विटप्रार्थनया मैत्रेयः शान्तः भवति । विटः शकारं ततो गमनार्थं कथयति । किन्तु शकारो वसन्तसेनां विना न गन्तुमिच्छति । विटो गच्छति । ततो मैत्रेयेण चारुदत्ताय च वसन्तसेनाऽप्रत्यर्पणनिमित्तकं मरणान्तं वैरमुद्घोष्य शकारोऽपि चेटेन सह गच्छति । स्वापमानकथां न चार्येण चारुदत्तेन कथनीयेति परामृश्य विदूषकः रदनिकया सह निर्गच्छति ।

चारुदत्तः वसन्तसेनामेव रदनिकां बुद्ध्वा शीताकुलं रोहसेनम् अन्तर्नयनार्थमादिशति, तच्छादनार्थं प्रावारकञ्च प्रयच्छति । परन्तु वसन्तसेना चारुदत्तहस्तादुत्तरीयं गृहीत्वाऽपि गणिकाकन्यात्वात् गृहाभ्यन्तरं प्रवेष्टुं साहसं न करोति । परन्तु चारुदत्तः रदनिकाऽपि मदीयदारिद्र्यप्रभावेण मम वचनं न शृणोति, न च प्रतिवचनमेव ददाति इत्यनुभूय दुःखितः भवति । तदानीमेव समये रदनिकया सह विदूषकः आगत्य नेयं रदनिका इति कथयति । पश्चात् चारुदत्तः 'सा वसन्तसेना' इति ज्ञात्वा रदनिकेति मत्वा दासीतुल्यव्यवहाराय क्षमां याचते । वसन्तसेनाऽपि विना अनुमत्या गृहे प्रवेशार्थं क्षमां प्रार्थयते । ततः वसन्तसेना एते शकारादयः ममालङ्कारार्थं मामनुसरन्तः इति उक्त्वा स्वकीयानि सर्वाणि अलङ्काराणि शरीरात् विमोच्य चारुदत्तस्य समीपे न्यासरूपेण स्थापयति । विदूषकेन सह चारुदत्तो वसन्तसेनां तस्या गृहे प्रवेश्य परावृत्य च सुवर्णभाण्डस्य रक्षाभारं दिवा वर्धमानकस्य रात्रौ च विदूषकस्योपरि निक्षिपति ।

## द्वितीयोऽङ्कः

वसन्तसेनामाता चेटीमुखेन वसन्तसेनां स्नानादिकर्म समाप्य देवपूजाकरणार्थं आदिशति । परन्तु वसन्तसेना ब्राह्मणेन देवपूजां समापय इति चेटीमाध्यमेन मातरं ज्ञापयति । ततः चारुदत्तसक्ता वसन्तसेना

मदनिकासमीपे चारुदत्तं प्रति स्वस्याः अनुरागभावविषये प्रकाशयति । द्यूते पराजितो द्यूतकरमाथुरभयात् संवाहको द्यूतस्य निन्दां कुर्वन् मूर्त्तिरहितमन्दिरे मूर्त्तिस्थाने मूर्त्तिवत्स्थितो भवति । तदन्विषन्तौ माथुरद्यूतकरौ जनशून्ये तस्मिन्नेव देवालये पुनर्द्यूतमारभतः संवाहकश्च तयोर्द्यूतक्रीडनदर्शनेन स्वकीयद्यूतक्रीडनलोभमनवरुद्धन् सहसोपसृत्य 'मम पाठे' इति कथयति । एवं सहसोपसृतं संवाहकं माथुरद्यूतकरौ गृहीत्वा बहुविधं ताडयतः जितं दशसुवर्णञ्च याचयतः । संवाहकः 'कुतो दास्यामि' इत्युक्ते माथुरद्यूतकरौ 'आत्मानं विक्रीय' इति कथयतः । 'क्रीडिध्वं मामिति राजमार्गे विज्ञापिते न कश्चिदुत्तरयति । ततः 'कुतो दास्यामि' इत्युक्ते माथुरस्तं कर्षति, ततः अकस्मात् दर्दुरक आगच्छति । नानाविवादसंवादानन्तरं दर्दुरकः माथुरस्य चक्षुषी पांशुना पूरयित्वा संवाहकं मोचयित्वा पलायितुं संकेतितवान् । संवाहकः अपि पलायितवान् । अनन्तरं माथुरद्यूतकरभयेन पलायमानः संवाहकः वसन्तसेनायाः गृहे प्रविश्य तस्याः शरणं गतः । संवाहकस्य नासिकाभ्रंशरुधिरपथमनुसरन्तौ माथुरद्यूतकरावपि तत्रागत्य बहिरेव तदुपरोधया स्थितौ । परिचयप्रसङ्गे चारुदत्तस्योपरतविभवेन निवृतसेवक इति श्रुत्वा वसन्तसेना संवाहकं समाह्वियते । 'द्यूतोपजीविना मया दशसुवर्णं हारितम्, तेन एतौ मामनुसन्धतः' इति संवाहकमुखात् श्रुत्वा वसन्तसेना सेविकया स्वहस्ताभरणं दत्त्वा तौ परावर्तयति । द्यूतकरापमानकारणेन वसन्तसेनया वारितेऽपि शाक्यश्रमणो भविष्यामीति निश्चित्य संवाहकः प्रस्थितवान् ।

वसन्तसेनया दत्तमाभरणं गृहीत्वा सन्तुष्टौ माथुरद्यूतकरौ संवाहकं त्यक्त्वा परावृत्तौ । खिन्नः संवाहकः बौद्धधर्मं स्वीकृतवान् ।

ततः कर्णपूरकः प्रविश्य खुण्टमोडुकनामकहस्तिविषयकोपद्रवस्य वृत्तान्तं वसन्तसेनां कथयति । स कथयति यत् तं गजं हत्वा मया परिव्राजकरक्षणं कृतम् । अनेन पराक्रमेण प्रसन्नः चारुदत्तः मह्यं पारितोषिकरूपेण प्रावारकमिदं ददाति स्म । तदनन्तरं प्राप्तं प्रावारकं वसन्तसेनायै समर्पयति । वसन्तसेना प्रावारकं गृहीत्वा चारुदत्तं द्रष्टुं समुत्सुका सन्ती प्रासादोपरि गच्छति ।

## तृतीयोऽङ्कः

चारुदत्तस्य चेटो मध्यरात्रावपि गृहमनागते चारुदत्ते, स्वाभाविकान्दोषान् वर्णयित्वाऽतिचिन्तितो बहिर्द्वारशालायां स्वपिति । ततो रेभिलगृहाद् गीतं श्रुत्वा विदूषकेन सहागच्छन् मार्गे रेभिलगीतं प्रशंसयति । विदूषकः शीघ्रं गृहं गमनार्थं कथयति । गृहं गत्वा विदूषको वर्धमानकमाह्वयति । स च द्वारमुद्घाटयति । प्रविश्योभौ पादौ प्रक्षाल्य शयितुं गच्छतः । चेटः रात्रौ सुवर्णभाण्डस्य रक्षार्थं स्मारयन् विदूषकायार्पयति । विदूषकोऽपि स्वर्णभाण्डं गृहीत्वा स्वपिति । ततः शार्विलकश्चौर्यकलायां स्वनैपुण्यं वर्णयित्वा सन्धिं कृत्वा चारुदत्तगृहं प्रविशति । चौर्येण निपुणतया परितो निरीक्ष्य परमार्थदरिद्रोऽयमतो गन्तव्यम् इति यदा विचारयति तदैव विदूषकः स्वप्ने चौरभयेन सुवर्णभाण्डं चारुदत्तायार्पणार्थमुद्योगमावहति । वस्तुस्थितिञ्च परिज्ञाय शर्विलकः सुवर्णभाण्डं गृहीत्वा यदा बहिर्गन्तुमिच्छति तस्मिन्नेव काले वर्धमानकमपश्यन्ती रदनिका विदूषकार्यमागच्छन्ती दृष्ट्वा तां हन्तुमिच्छन्नपि स्त्रियमिति ज्ञात्वा शर्विलको निर्गच्छति । इतो रदनिकाकोलाहलेन चारुदत्तो विदूषकश्च निद्रारहितौ सञ्जातौ । चारुदत्तश्चौरकृतां सन्धिं प्रशंसयति । विदूषकस्य स्वात्मना चारुदत्ताय समर्पितस्य सुवर्णभाण्डस्य चर्चयाऽतिसन्तुष्टो भवति चारुदत्तः यद् मद्गृहान्निराशो न जातश्चौरः । किन्तु न्यास इति स्मारिते मूर्च्छितो भवति । सान्त्वयता च विदूषकेन मन्निर्धनतया को विश्वसिति इत्युक्त्वाऽतिदुःखितो भवति चारुदत्तः । रदनिकया चौरसमाचारं ज्ञात्वा धूतापि (चारुदत्तभार्या) मूर्च्छिता सञ्जाता । स्वपतेर्लोकापवादक्षालनार्थं धूता स्वकीयां रत्नमालां विदूषकद्वारा चारुदत्ताय ददाति । विदूषकेन वारितेऽपि चारुदत्तो रत्नमालां वसन्तसेनासविधे प्रेषयति । सन्धिं पूरयितुञ्च वर्धमानकमादिशति, येन चौर्यकर्मणः प्रचारो न भवतु, स्वयं च प्रातःकालीननित्यकर्मसम्पादनार्थं गच्छति ।

## चतुर्थोऽङ्कः

वसन्तसेना मदनिका च चारुदत्तस्य चित्रं पश्यन्त्यौ मञ्चे प्रविशतः । तदानीमेवागत्य चेटी मातुरादेशं वसन्तसेनां श्रावयति यद् राजश्यालकस्य प्रवहणं पक्षद्वारे सज्जं तिष्ठति, गच्छ । तेन सुवर्णदशसाहस्रिकोऽलङ्कारोऽपि प्रेषितः । आदेशं श्रुत्वा शकारनाम्ना परमकुपिता वसन्तसेना प्राणत्यागभयदानपूर्वकं पुनरेतादृशस्यादेशस्य वारणं करोति । ततः शर्विलकः चौर्यकलादिवर्णनपुरःसरं मदनिकां मोचनार्थं वसन्तसेनागृहं यावत्प्रविशति, तावदेव वसन्तसेनया चारुदत्तस्य चित्रं शयनकक्षे स्थापनार्थं तालवृतकानयनार्थञ्चाज्ञापिता मदनिका शयनकक्षं प्रत्यागच्छन्ती प्राप्ता । मदनिकागमविलम्बोत्सुका वसन्तसेना गवाक्षेणोभयोः प्रेक्षणं करोति । शर्विलकः मदनिकायै चोरितं स्वर्णभूषणं तां दर्शयति । मदनिका चालङ्कारानपि परिचिनोति । तस्यै सर्वं ज्ञापयति शर्विलकः । मदनिका चारुदत्ताय परावर्तयितुं परामृशति । स्वासमर्थतां कथयति सः । तर्हि वसन्तसेनायै अर्पय चारुदत्तसम्बन्धिरूपेण इति परामृशति । स्वीकृते च शर्विलके तत्र साहाय्यं करोति मदनिका । पूर्वमेव सर्वं श्रुतत्वाद् वसन्तसेनाऽक्षतञ्च चारुदत्तं ज्ञात्वाऽतिप्रसन्ना प्रत्यर्पिताभूषणकाय शर्विलकायातिपाटवेन मदनिकां वधूरूपेण समर्प्य प्रवहणकेण प्रेष्यति सानुरागम् ।

प्रवहकेण वध्वा गच्छन्नेव शर्विलको 'गोपालदारको राज्ञा पालकेन वन्दीकृत' इति श्रुत्वा तत्साहाय्यार्थं मदनिकयाऽनुमतिं प्राप्य मदनिकाञ्च चेटेन सह सार्थवाहरेभिलस्य गृहं प्रेष्यातिव्यग्रतया गच्छति । ततश्चेटी 'चारुदत्तप्रेषितः कश्चिद्ब्राह्मण आगत' इति वसन्तसेनां सूचयति । प्रवेशयेति कथितेऽष्टप्रकोष्ठान्यवलोक्य कुबेरभवनमुपमीय वृक्षवाटिकायां प्रविष्टो विदूषकः 'चारुदत्तस्तव सुवर्णभाण्डं द्यूते पराजितमि'ति उक्त्वा तत्स्थाने रत्नमालां ददाति । वसन्तसेना तु ज्ञातसर्ववृत्तान्ता 'आयश्चारुदत्तो द्यूतकरः संवृतः चौरेणापहृतार्थमपि' इति तन्महिम्नि मुह्यति विहस्य सखीमुखं पश्यन्ती रत्नावलीञ्च गृहीत्वा, प्रदोषे आर्यं प्रेक्षितुमागच्छामीति संदिश्य विदूषकं प्रत्यावर्तयति । स्वयमपि शीघ्रं गमनार्थं रत्नावलीं गृहीत्वा चेटीमादिशति ।

## पञ्चमोऽङ्कः

उत्कण्ठितस्य चारुदत्तस्य सविधे विदूषको रत्नावल्याः स्वीकरणं वसन्तसेनाया आगमनञ्च सूचयति । वसन्तसेनया स्वापमानेन रत्नावलीस्वीकरणेन च कुपितो विदूषको वेश्यासम्पर्कं समापयितुं प्रेरयति चारुदत्तम् । तदानीमेव चेटो वसन्तसेनागमनसन्देशं सूचयति । चारुदत्तगृहमाच्छन्ती वसन्तसेना विटश्च वर्षावर्णनं कुरुतः । पश्चाच्चातितीव्रवर्षाविद्युता वाक्षिपति गमनरोधार्थम् । चारुदत्तगृहं गत्वा विटोदघोषेणाकृष्टचारुदत्तेन प्रेषितो विदूषको वहिरागत्य वसन्तसेनया सह मिलति । छत्रधारिण्या सह विटं परावृत्य विदूषकेन चेट्या च सह चारुदत्तवाटिकायां प्रविशति वसन्तसेना । चारुदत्तो वसन्तसेनायाः स्वागतं करोति । विदूषको वसन्तसेनाऽऽगमनकारणं पृच्छति । चेटी उत्तरयति यद् रत्नावलीमूल्यं प्रष्टुं समागता । यतो सा रत्नावली स्वामिन्या (वसन्तसेनया) द्यूते पराजिता । अतस्तत्स्थाने च सुवर्णभाण्डं प्रयच्छति । सुवर्णभाण्डं दृष्ट्वा चारुदत्तविदूषकौ चकितौ सञ्जातौ । ततश्चेटी सुवर्णभाण्डप्राप्तेः सर्ववृत्तान्तं विदूषककर्णे कथयति विदूषकश्च चारुदत्तकर्णे कथयति । सर्वे प्रसन्ना भवन्ति । विदूषको तदानीं वर्षां निन्दति । चारुदत्तः स्निग्धवार्तया नार्हस्युपालब्धुमिति वारयित्वा वर्षायां कामिनीगात्रगाढालिङ्गनेन जीवनं धन्यं भवतीति सर्वथा तत्सार्थक्यं प्रदर्श्य वसन्तसेनयान्तः प्रविशति । रात्रौ सा तत्रैव तिष्ठति ।

## षष्ठोऽङ्कः

शयन्तीं वसन्तसेनां तच्चेटी प्रतिबोधयति । चारुदत्तो जीर्णोद्यानं गतः, प्रवहणकेन वसन्तसेनाऽपि तत्रैवानेयेति सूचयति च । अतीवाश्वस्ता वसन्तसेना आत्मानं 'चारुदत्तगुणनिर्जिता दासी' इति निवेदनेन धूतायै रत्नावलीं प्रेषयति । आर्यपुत्रेण युष्मत् प्रसादीकृता, आर्यपुत्र एव मम आभरणविशेष इति च विज्ञाप्य धूता रत्नावलीं न स्वीकरोति । ततः चारुदत्तचेटी रदनिका चारुदत्तपुत्रं रोहसेनमङ्कमादायागच्छति रङ्गमञ्चे ।

सुवर्णशकटिकायै रुदते रोहसेनाय मृच्छकटिकां ददाति । परन्तु ''किमनया मृच्छकटिकया तामेव सौवर्णशकटिकां देहीति'' रुदन्तं रोहसेनमाश्वासयन्ती रदनिका वसन्तसेनासमीपं गच्छति । वसन्तसेना च तत्परिचयं प्राप्योपलालयन्ती स्वाङ्के गृहीत्वा तद्रोदनकारणञ्च ज्ञात्वा तस्मै सुवर्णशकटिकार्थं स्वसुवर्णालङ्कारणि पूरयति मृच्छकटिकायाम् ।

अन्यतश्चारुदत्तचेटो वर्धमानकः प्रवहणकमानयति । आगतं प्रवहणकमिति रदनिका सूचयति वसन्तसेनाम् । विस्मृतं प्रवहणाच्छादनकमिति वर्धमानको यदा प्रवहणाच्छादनकं नेतुं गच्छति, तदानीमेव अन्यशकटचक्रपरिवर्तसहायतार्थं गतेन शकारचेटेनोपस्थापितं प्रवहणकं चारुदत्तप्रवहणभ्रमेण गृहाद् बहिरागच्छन्ती वसन्तसेनाऽऽरोहेति, आगत्य शकारचेटः स्थावरकः स्वशकटं नयति । मार्गे गोपालदारकः कारागारात्पलाय आर्यकः नं कृत्वा सम्भ्रममवलोक्य शीघ्रं गच्छति राजपुरुषेभ्य आत्मानं रक्षितुं च चारुदत्तस्य वाटिकापक्षद्वारमागच्छति । तदानीमेव तत्र वर्धमानकः स्वप्रवहणमानयति । 'रदनिके, आर्या प्रवहणेऽधिरुह्य जीर्णोद्यानं गच्छत्विति' कथिते वर्धमानके, आर्यकम् आरोहयितुमुपसर्पतीति तेन निगडशब्दं नूपूरध्वनिमनुमाय 'पृष्ठत आरोहतु' इत्यनवलोक्यैव कथिते, आरोहति आर्यकः वर्धमानकः चापि प्रवहणं पुष्पकरण्डकोद्यानं नेतुमारब्धः । तदानीमेवागत्य वीरकचन्दनकौ राजपुरुषौ वर्धमानकमवरोधयतः । चन्दनकः प्रवहणमारुह्यावलोकयति । आर्यकस्तेन स्वरक्षां याचते । तस्मै चन्दनकोऽभयदानं करोति । प्रवहणादवतीर्य चन्दनको वीरकायात्र वसन्तसेना विद्यते इति निवेदयति । परन्तु तदुपरि वीरको न विश्वसीति । तौ परस्परं युद्ध्यतः । चन्दनको वीरकं ताडयति । चन्दनकसङ्केतेन वर्धमानको प्रवहणं नीत्वा गच्छति । चन्दनक आर्यकाय खड्गं ददाति । आर्यकश्चन्दनकं स्मर्तुं प्रतिजानीते । प्रसन्नो भूत्वा चन्दनक आशीर्वदति । चेटः प्रवहेण निर्गच्छति । चन्दनकोऽपि स्वमित्रशर्विलक इव भ्रातृपुत्रपरिवृत आर्यकमेवानुगच्छामीति विचार्य गच्छति ।

## सप्तमोऽङ्कः

चारुदत्तविदूषकौ वसन्तसेनां प्रतीक्षतः प्रवहणस्यागमने जायमानविलम्बे वितर्कयतः च तावदेव गुप्ताधिरूढार्यकमानयतो वर्धमानकस्य 'आर्य मैत्रेय' इति सम्बोधनं श्रुत्वाऽतिप्रसन्नो विदूषकश्चारुदत्तं वसन्तसेनाऽऽगतेति सूचयति । प्रवहणस्थश्चार्यकोऽपि श्रुतचारुदत्तप्रशंसश्चारुदत्तदर्शनानन्तरमेवान्यच्छरणं गच्छामीति चिन्तयति स्म । प्रवहणस्य समीपम् आगतेन चारुदत्तेन विलम्बकारणे पृष्टे यानस्तरणविस्मृतिं तदानयनञ्च ज्ञापयति चेटः । चारुदत्तपरामर्शेण यदा विदूषकः प्रवहणमुद्घाट्य 'न वसन्तसेना, वसन्तसेनः खल्वेषः' इति वक्ति, तदा परिहास इति ज्ञात्वा स्वयमेवावतारणार्थं प्रवहणमधिरुह्य तथाविधं पुरुषं दृष्ट्वा तस्य परिचयं पृच्छति । 'शरणागतो गोपालप्रकृतिरार्यक' इति श्रुत्वा ज्ञात्वा च सर्वमभयं ददाति । निगडमपनीय गोपालक दारकस्य स्वप्रवहेणैव प्रेषयति । निगडं पूराणकूपे निक्षेप्तुं मैत्रेयमादिश्य वामाक्षिस्पन्दनेन श्रमणदर्शनिनि चानिष्टं पश्यन् निष्क्रान्तो मैत्रेयेण विदूषकेन सह चारुदत्तः ।

## अष्टमोऽङ्कः

आर्द्रचीवरहस्तो भिक्षुः प्रविशति, धर्मञ्चोपदिशति । विटेन सह शकारस्तत्रागत्योद्यानपुष्करिण्यां चीवरक्षालनाभियोगे जन्मत एवाप्राव्रज्याभियोगे च भिक्षुं ताडयति । तथाकरणार्थं विटोऽवरोधयति । शकारकथनेन भिक्षुस्तत्प्रशंस्य पलायते । शकारविटौ स्थावरकप्रवहणं प्रतीक्षतः । प्रवहणेन तदानीमेवागच्छति स्थावरकः । शकारो विटं पूर्वमुक्त्वापि तमपवार्य स्वयमारोहति प्रवहणे । तत्र स्थितां वसन्तसेनां दृष्ट्वा शकारे भीते सति, विट आरुह्य वसन्तसेनाञ्च ज्ञात्वा विस्मितो जातः । वसन्तसेना विटं प्रार्थयति स्वरक्षार्थम् । अवतीर्यात्र राक्षसीति शकारं कथयति विटः । अतो पदातिरेव गन्तव्यमिति शकारं परामृशति । परन्तु सा राक्षसी त्वां कथन्नखादतीति प्रवहण एव गमिष्यामीति च शकारेणोक्ते, विटो त्वया सह रमणार्थमागता वसन्तसेनेति कथयति । अनन्तरं शकारः प्रणतिपुरःसरं रतिं याचते वसन्तसेनाम् । परन्तु वसन्तसेना शकारं पादेन ताडयति ।

ततः शकारोऽपि वसन्तसेनां ताडयितुं प्रलोभनेन चेटमादिशति, परन्तु चेटो न स्वीकरोति, अतः शकारश्चेटमेव ताडयित्वा बहिष्करोति । अनन्तरं यदा स्वयमेव वसन्तसेना ताडयितुं यतते, तदा विटो गले गृहीत्वा शकारं पातयति । ततो वसन्तसेना तवाग्रतो लज्जते, अतो चेटग्रहणार्थं गच्छतु एषा न्यासेन तिष्ठत्विति युक्त्या विटमपसार्य कुसुमावचयादिद्वारा वञ्चयित्वा, वसन्तसेनां रतिं याचते । यदा वसन्तसेना न स्वीकरोति तदा तस्याः कण्ठे पीडन् निश्चेटितः । चेटेन सहागत्य विटो यदा मम न्यासमुपनयेति वहुविधं कथयति, तदा मया मारितेति प्रकटयति, संज्ञाशून्यां वसन्तसेनां च दर्शयति । विटो वहुदुःखितो भवति । अपवादशङ्कया च यदा गन्तुमिच्छति तदा शकारः परापराधविज्ञानार्थं प्रेरयति । अस्वीकृते च विटे राज्ञः समीपे नयनार्थं धारयति, विटः खड्गापकर्षणेन च त्यजति । अतः शकारं परित्यज्य शर्विलकपार्श्वे गच्छति विटः । चेटमपि 'गावो नयेति प्रेषयित्वा चेटं निगडपूरितं करोति शकारः । वसन्तसेनाशरीरं शुष्कपर्णैराच्छादयति । स्वयं च चारुदत्तविरुद्धं वसन्तसेनाहत्याभियोगं न्यायाधिकरणे स्थापयितुं गच्छति । तत आर्द्रचीवरहस्तो भिक्षुको मञ्चे प्रविशति । स यदा चीवरं प्रसारयितुं वाञ्छति तदैव संज्ञाप्राप्ताया वसन्तसेनाया हस्तं दृष्ट्वा वहुविधं च निर्वण्य वसन्तसेनां परिचीय स्वपरिचयञ्च दत्त्वा विश्रामार्थं बौद्धविहारं नयति ।

## नवमोऽङ्कः

शोधनकोऽधिकरणभोजकैरादिष्टोऽधिकरणमण्डपं सज्जं कारयति । तदानीमेवागत्य शकारश्चारुदत्तं न्यायालये वसन्तसेनाया हत्ययाऽऽरोपयितुमधिकरणिकान्प्रतीक्षमाणास्तिष्ठति । अधिकरणिकेषुत्तमागतेषु पुष्पकरण्डकोद्याने धनलोभात् केनचिद् वसन्तसेना बाहुपाशबलात्कारेण मारितेति व्यवहारमुपस्थापयति । वसन्तसेना क्व गताऽऽसीदिति ज्ञानार्थमधिकरणिको वसन्तसेनामातरमाह्वयति । सा च (वसन्तसेनामाता) तत्रागत्य 'वसन्तसेना चारुदत्तगृहं गताऽस्ति' इति कथयति । अतोऽधिकरणिकश्चारुदत्तमाह्वयति । वसन्तसेनया सह स्वमैत्रीं स्वीकरोति चारुदत्तः, वसन्तसेना गृहं गतेति च ज्ञापयति । तदानीमेवागत्य वीरको न्यायालये चन्दनकेन सह स्वविवादं-वादार्थं श्रावयति । तेन चारुदत्तप्रवहणमारुह्य वसन्तसेना पुष्पकरण्डकोद्यानं गतेति ज्ञायते । अतोऽधिकरणिको वीरकं तत्र गत्वा द्रष्टुमादिशति गत्वाऽऽगत्य च वीरकस्तत्र स्त्रीशरीरं पतितं मया दृष्टमिति सप्रमाणमुपस्थापयति । चारुदत्तो न्यायालयम् आहूत इति रेभिल मुखात् श्रुत्वा वसन्तसेना भूषणानि वसन्तसेनागृहं गम्यमानः विदूषकः वसन्तसेनागृहं न गत्वा वसन्तसेनाऽऽभूषणसहितं न्यायालयं गतवान् । तत्र शकारेण सह विदूषकस्य विवादो जातः । विवादे च विदूषककक्षत आभूषणानि भूमौ पतितानि । शकारस्तान्युत्थाप्य न्यायलये सर्वेषां समक्षं प्रमाणयति । अधिकरणिकेन पृष्टे चारुदत्तो वसन्तसेनाऽऽभरणानीति स्वीकरोति, परन्तु कथं ततः पृथग्भूतानीत्यत्र स्वानभिज्ञतां प्रकटयति । अधिकरणिकः सर्ववादप्रसङ्गेन चारुदत्तोऽत्रापराधी इति स्वीकरोति । स्वनिर्णयञ्च राज्ञः पालकस्य सविधे प्रेषयति । राजापि चारुदत्ताय प्राणदण्डमादिशति । चारुदत्तो विदूषकेन रोहसेनस्य स्वपुत्रस्य दर्शनं वाञ्छति ।

## दशमोऽङ्कः

चारुदत्तश्चाण्डालैर्वधस्थानं नीयते । तत्रैव विदूषकोऽपि चारुदत्तपुत्रेण रोहसेनेन उपस्थितो भवति । विदूषकरोहसेनौ चारुदत्तस्थाने स्ववधं प्रार्थयतः । इतः शकारगृहे बद्धः स्थावरकः 'शकारेण वसन्तसेना हता न चारुदत्तेन' इति चीत्कृत्य कथयति, परन्तु तत्कथनं कश्चिदपि न श्रृणोति । अत आत्मानं जीर्णगवाक्षेण पातयित्वा पूर्वोक्तं चाण्डालान् कथयति । परन्तु तदानीमेवागत्य शकारस्तं ताडयित्वा ततो निष्कासयति । शकारश्चारुदत्तं मारयितुं शीघ्रं कुरु इति पुनः पुनश्चाण्डालौ कथयति । वध्यपालिकार्थं निर्णीय वधे विलम्बकारणस्य सार्थक्ये च स्थापिते, श्मशाने चतुर्थघोषणां कुरुतः । ततो भिक्षुकेण सह वसन्तसेना ससम्भ्रमा चारुदत्तगृहं गन्तुमिच्छति । गमनवेलायां कलकलं श्रुत्वा जनसमूहञ्चावलोकयतस्तदानीमेव 'चारुदत्त शीघ्रमेव मार्यसे' इति चाण्डालघोषणां श्रुत्वा वस्तुस्थितिं वसन्तसेनायै भिक्षुर्ज्ञापयति । ततो भिक्षुकेण सह वसन्तसेना

ततः शकारोऽपि वसन्तसेनां ताडयितुं प्रलोभनेन चेटमादिशति, परन्तु चेटो न स्वीकरोति, अतः शकारश्चेटमेव ताडयित्वा बहिष्करोति । अनन्तरं यदा स्वयमेव वसन्तसेना ताडयितुं यतते, तदा विटो गले गृहीत्वा शकारं पातयति । ततो वसन्तसेना तवाग्रतो लज्जते, अतो चेटग्रहणार्थं गच्छतु एषा न्यासेन तिष्ठत्विति युक्त्या विटमपसार्य कुसुमावचयादिद्वारा वञ्चयित्वा, वसन्तसेनां रतिं याचते । यदा वसन्तसेना न स्वीकरोति तदा तस्याः कण्ठे पीडन् निश्चेष्टितः । चेटेन सहागत्य विटो यदा मम न्यासमुपनयेति वहुविधं कथयति, तदा मया मारितेति प्रकटयति, संज्ञाशून्यां वसन्तसेनां च दर्शयति । विटो वहुदुःखितो भवति । अपवादशङ्कया च यदा गन्तुमिच्छति तदा शकारः परापराधविज्ञानार्थं प्रेरयति । अस्वीकृते च विटे राज्ञः समीपे नयनार्थं धारयति, विटः खड्गापकर्षणेन च त्यजति । अतः शकारं परित्यज्य शर्विलकपार्श्वे गच्छति विटः । चेटमपि 'गावो नयेति प्रेषयित्वा चेटं निगडपूरितं करोति शकारः । वसन्तसेनाशरीरं शुष्कपर्णैराच्छादयति । स्वयं च चारुदत्तविरुद्धं वसन्तसेनाहत्याभियोगं न्यायाधिकरणे स्थापयितुं गच्छति । तत आर्द्रचीवरहस्तो भिक्षुको मञ्चे प्रविशति । स यदा चीवरं प्रसारयितुं वाञ्छति तदैव संज्ञाप्राप्ताया वसन्तसेनाया हस्तं दृष्ट्वा वहुविधं च निर्वर्ण्य वसन्तसेनां परिचीय स्वपरिचयञ्च दत्त्वा विश्रामार्थं बौद्धविहारं नयति ।

## नवमोऽङ्कः

शोधनकोऽधिकरणभोजकैरादिष्टोऽधिकरणमण्डपं सज्जं कारयति । तदानीमेवागत्य शकारश्चारुदत्तं न्यायालये वसन्तसेनाया हत्ययाऽऽरोपयितुमधिकरणिकान्प्रतीक्षमाणास्तिष्ठति । अधिकरणिकेषुत्तमागतेषु पुष्पकरण्डकोद्याने धनलोभात् केनचिद् वसन्तसेना बाहुपाशवलात्कारेण मारितेति व्यवहारमुपस्थापयति । वसन्तसेना क्व गताऽऽसीदिति ज्ञानार्थमधिकरणिको वसन्तसेनामातरमाह्वयति । सा च (वसन्तसेनामाता) तत्रागत्य 'वसन्तसेना चारुदत्तगृहं गताऽस्ति' इति कथयति । अतोऽधिकरणिकश्चारुदत्तमाह्वयति । वसन्तसेनया सह स्वमैत्रीं स्वीकरोति चारुदत्तः, वसन्तसेना गृहं गतेति च ज्ञापयति । तदानीमेवागत्य वीरको न्यायालये चन्दनकेन सह स्वविवादं वादार्थं श्रावयति । तेन चारुदत्तप्रवहणमारुह्य वसन्तसेना पुष्पकरण्डकोद्यानं गतेति ज्ञायते । अतोऽधिकरणिको वीरकं तत्र गत्वा द्रष्टुमादिशति गत्वाऽऽगत्य च वीरकस्तत्र स्त्रीशरीरं पतितं मया दृष्टमिति सप्रमाणमुपस्थापयति । चारुदत्तो न्यायालयम् आहूत इति रेभिल मुखात् श्रुत्वा वसन्तसेना भूषणानि वसन्तसेनागृहं गम्यमानः विदूषकः वसन्तसेनागृहं न गत्वा वसन्तसेनाऽऽभूषणसहितं न्यायालयं गतवान् । तत्र शकारेण सह विदूषकस्य विवादो जातः । विवादे च विदूषककक्षत आभूषणानि भूमौ पतितानि । शकारस्तान्युत्थाप्य न्यायलये सर्वेषां समक्षं प्रमाणयति । अधिकरणिकेन पृष्टे चारुदत्तो वसन्तसेनाऽऽभरणानीति स्वीकरोति, परन्तु कथं ततः पृथग्भूतानीत्यत्र स्वानभिज्ञतां प्रकटयति । अधिकरणिकः सर्ववादप्रसङ्गेन चारुदत्तोऽत्रापराधी इति स्वीकरोति । स्वनिर्णयञ्च राज्ञः पालकस्य सविधे प्रेषयति । राजापि चारुदत्ताय प्राणदण्डमादिशति । चारुदत्तो विदूषकेन रोहसेनस्य स्वपुत्रस्य दर्शनं वाञ्छति ।

## दशमोऽङ्कः

चारुदत्तश्चाण्डालैर्वधस्थानं नीयते । तत्रैव विदूषकोऽपि चारुदत्तपुत्रेण रोहसेनेन उपस्थितो भवति । विदूषकरोहसेनौ चारुदत्तस्थाने स्ववधं प्रार्थयतः । इतः शकारगृहे बद्धः स्थावरकः 'शकारेण वसन्तसेना हता न चारुदत्तेन' इति चीत्कृत्य कथयति, परन्तु तत्कथनं कश्चिदपि न श्रृणोति । अत आत्मानं जीर्णगवाक्षेण पातयित्वा पूर्वोक्तं चाण्डालान् कथयति । परन्तु तदानीमेवागत्य शकारस्तं ताडयित्वा ततो निष्कासयति । शकारश्चारुदत्तं मारयितुं शीघ्रं कुरु इति पुनः पुनश्चाण्डालौ कथयति । वध्यपालिकार्थं निर्णीय वधे विलम्बकारणस्य सार्थक्ये च स्थापिते, श्मशाने चतुर्थघोषणां कुरुतः । ततो भिक्षुकेण सह वसन्तसेना ससम्भ्रमा चारुदत्तगृहं गन्तुमिच्छति । गमनवेलायां कलकलं श्रुत्वा जनसमूहञ्चावलोकयतस्तदानीमेव 'चारुदत्त शीघ्रमेव मार्यसे' इति चाण्डालघोषणां श्रुत्वा वस्तुस्थितिं वसन्तसेनायै भिक्षुर्ज्ञापयति । ततो भिक्षुकेण सह वसन्तसेना

शीघ्रं वधस्थानं गच्छति । तदानीमेव चाण्डालश्चारुदत्तोपरि खड्गप्रहारं करोति, परन्तु दैववशाच्चाण्डालहस्तात्पतति खड्गः । ततश्चाण्डालौ चारुदत्तं शूलमारोहयितुमिच्छतः । तदानीमेव भिक्षुकेणोपस्थिता वसन्तसेनाऽऽत्मानं प्रकाशयति । तत्सूचनां दातुं चाण्डालौ राज्ञः सविधे गच्छतः । वसन्तसेना जीवितेति शकारोऽपि पलायते । राज्ञ आज्ञया शकारमेवान्वेषणार्थं निष्क्रान्तौ चाण्डालौ । चारुदत्तो वधाद्वञ्चितो भिक्षुवसन्तसेनाभ्यां च मिलित्वा ज्ञात्वा च सर्वमाश्चर्यान्वितोऽतिप्रसन्नश्च सञ्जातः । ततः शर्विलकः प्रविश्यार्यकेण राज्ञः पालकस्य वधं श्रावयति । जनैश्च शकारश्चारुदत्तसमीपे आनीयते । स्वशरणागतश्च शकारं चारुदत्तोऽभयं करोति । अपरतश्चन्दनकस्तत्रागत्य चारुदत्तवधश्रवणेन धूता प्राणान् त्यक्तुं गच्छतीति श्रावयति । अतः सर्वे तत्र शीघ्रं गच्छन्ति, चारुदत्तश्च निरोधयति धूतां चितायां प्राणत्यागतः । धूता वसन्तसेना च परस्परमालिङ्गतः । राजा त्वां वधूशब्देनालङ्करोतीति शर्विलको वसन्तसेनां कथयति । चारुदत्तनिर्देशेन भिक्षुकः सकलविहाराणां कुलपतिः क्रियते । शकारदास्या स्थावरको मोचितः । चाण्डालौ च चाण्डालाधिपती क्रियेते । चन्दनकः पृथ्वीदण्डपालकपदे नियुज्यते । शकारस्याप्यधिकारः पूर्ववत्स्थाप्यते । अनन्तरं भरतवाक्येन सह सर्वे निष्क्रान्ताः ।

## ३. मृच्छकटिकमवलम्ब्य तात्कालिकं समाजचित्रं प्रदीयताम् ?

नाटकप्रकरणादीनि दृश्यकाव्यानि समाजस्य दर्पणस्वरूपाणि भवन्ति ।समाजे यत् सर्व संघटित भवति, तत्सर्वं नाटकप्रकरणादिषु प्रतिफलितं भवति । अतः मृच्छकटिकप्रकरणे तात्कालिकं समाजचित्रं स्पष्टतया उल्लिखितमस्ति ।

### (क) वर्णव्यवस्था-

वैदिककालस्य प्रारम्भे समाजे वर्णव्यवस्था कर्मानुसारिणी आसीत् । कर्मानुसारं ब्राह्मणः क्षत्रियः वैश्यः शूद्रश्चेति चतुर्णां वर्णानाम् समुत्पन्नमभवत् । परवर्त्तीकाले इयं वर्णव्यवस्था जात्यानुसारिणी आसीत् । ब्राह्मणः वेदवेदान्ताध्ययने देवपूजादिकरणे च नियुक्तः अभवत् । क्षत्रियः देशस्य सुरक्षार्थे नियुक्तः आसीत्। वैश्यः वाणिज्यव्यवसायकर्मभिः देशं समृद्धम् अकरोत्, शूद्रः एतेषां त्रयाणां वर्णानां सेवाकरणे नियुक्तः अभवत् ।

शूद्रकस्य समीपे वर्णव्यवस्था कठोररूपेण पालिता नाभवत् । एकः ब्रह्मणः अक्लेशेन क्षत्रियः अभवत् । क्षत्रियःअपि वैश्यः भवितुं समर्थः आसीत् । वैश्यः अपि देशस्य शासनभारं स्वहस्ते धारयितुं समर्थः आसीत्। यतो हि मृच्छकटिकप्रकरणस्य नायकः चारुदत्तः जात्या ब्राह्मणः आसीत् । परन्तु वृत्या वैश्यः आसीत् । मृच्छकटिकप्रकरणस्य नायिका वसन्तसेना अपि जात्या वेश्या आसीत् । परन्तु वृत्तिरूपेण सा वेश्यावृत्तिं न गृहीतवती । आर्यकः अपि क्षत्रियकुले समुत्पन्नं न भूत्वाऽपि विद्रोहमाध्यमेन स्वशक्त्या राजसिंहासनस्याधिकारी अभवत् ।

### (ख)वेश्याप्रथा-

समाजे वेश्याप्रथा प्रचलिता आसीत् । अभिजात्यसंपन्नानां धनिकानां कृते वेश्यालयगमनं सम्मानजनकम् एव आसीत् । समाजे वेश्यानां स्थानं अत्युच्चैः अतिष्ठत् । यदा चारुदत्तः धनिकः आसीत् तदा सः वेश्यालयं गतवान् । सः तत्र गणिकां गायिकां वसन्तसेनां दृष्ट्वा तस्याः सौन्दर्येण अनुरक्तः आसित् ।

### (ग)क्रीतदासप्रथा-

तदानीन्तमसमाजे क्रीतदासप्रथा प्रचलिता आसीत्। चारुदत्तस्य 'रदनिका' नाम्नी एका क्रीतदासी आसीत् । वसन्तसेनायाः अपि 'मदनिका' नाम्नी एका क्रीतदासी आसीत्, यां मुक्तकरणार्थं तस्याः प्रियतमः शर्विलक ! चारुदत्तस्य गृहे चौर्यकर्म कृतवान् ।

## (घ)सतीदाहप्रथा-

यदा चारुदत्तः वसन्तसेनायाःहत्यापराधेन अभियुक्तः सन् प्राणदण्डेन दण्डितः अभवत् । अपि च चण्डालः तं हन्तुं नीतवान् । तदा पतिव्रतापरायणा चारुदत्तस्य पत्नी सती धूता अपि पत्या सह सहमरणं कर्तुं उद्यता अभवत् । अस्मात् ज्ञायते यत् तस्मिन् समये सतीदाहप्रथा प्रचलिता आसीत् ।

## (ङ) द्युतक्रीडाचौर्यवृत्त्यादीनाम् प्रसारः-

शूद्रकस्य समये समाजे द्यूतक्रीडायाः प्रसारः अभवत् । द्यूतक्रीडा एकः क्राभ्यासः अस्ति। अनया द्यूतक्रीडया मनुष्यः स्वस्य सर्वाणि धनानि व्ययितवान् । अन्ते निःस्वः दरिद्रश्च संजातः । संवाहकः एनां द्यूतक्रीडां कृत्वा स्वस्य सर्वाणि धनानि हारितवान् । माथुरात् धनं ऋणरूपेण गृहीत्वा तत् अपि द्यूतेन हारितवान् । शेषे पश्चात्तापानले दग्धीभूतः सन् बौद्धभिक्षुकः संजातः ।

यद्यपि समाजस्य आर्थिकस्थितिः दुर्वला नासीत् तथापि समाजे कतिचित् दरिद्राः अपि न्यवसन् । तेषु शार्विलकः अन्यतमः । यः शार्विलकः जात्या चौरः नासीत् । परन्तु धनाभावात् मदनिकां वसन्तसेनायाः समीपात् मुक्तकरणार्थं सः चौर्यवृत्तिं अङ्गीकृतवान् । अस्मात् समाजे चौर्यवृत्तिः आपि सम्भवतीति विषये ज्ञायते।

## (च)धर्माचरणम्-

सामान्यतया जनाः धार्मिकाः दृश्यन्ते । वैदिकधर्मस्य प्रतिष्ठा आसीत् । यज्ञानुष्ठानानि अनुष्ठीयन्ते स्म । विषमस्थितौ अपि (दुःखसमयेऽपि) चारुदत्तः धर्मपालनं करोति । यदा विदूषकः चारुदत्तं कथयति यत् यद्देवं पूज्यमाना अपि देवता न ते प्रसीदन्ति, तत् को गुणो देवेषु अर्चितेषु ? तदा चारुदत्तः कथयति-वयस्य ! मामैवम्। गृहस्थस्य नित्योऽयं विधिः । तथाहि -

तपसा मनसा वाग्भिः पूजिता बालिकर्मभिः ।
तुष्यन्ति शमिनां नित्यं देवताः किं विचारितैः॥ (१६-प्रथमाङ्क)

राजा पालकोऽपि यज्ञशालायामेव आर्यकेण व्यापादितः । गणिका वसन्तसेना अपि पूजां करोति स्म। अभिरूपपतिव्रतस्य रत्नषष्ठीव्रतसय चाप्यत्र चर्चाऽस्ति । बौद्धधर्मोऽपि प्रतिष्ठितः आसीत् । भिक्षवः आचारवन्तः भवन्ति स्म । धनदानेन अपि अस्मिन् समये धर्मार्जनं क्रियते । चारुदत्तः धनं दानं कृत्वा कृत्वा एवं दरिद्रः संजातः ।

## (छ)न्यायप्रदानम्, दण्डप्रदानव्यवस्था च-

शूद्रकस्य समये राजतन्त्रशासनं प्रचालितमासीत् । राज्ये राजा श्रेष्ठः आसीत् । तस्य निर्देशेन राज्यकार्यं परिचालितं भवति । यदि राजा दुराचारी भवेत् तर्हि प्रजाः दुःखेन कालं यापयन्ति । यदि राजा सदाचारी भवेत्। तर्हि तस्य सुशासनेन प्रजाः सुखेन कालं यापयन्ति ।

मृच्छकटिके दुराचारिणः राज्ञः पालकस्य वर्णना दृश्यते । तस्य राज्ञः पालकस्य दुराचारेण पीडिताः सन्तः प्रजाः अतीव दुःखेन कालं यापयन्ति स्म । तस्य दुराचारिणः राज्ञः पालकस्य विनाशार्थं विद्रोही आर्यकः संघवद्धभावेन योजनां कृत्वा अन्ते तस्य विनाशम् अकरोत् । अस्मात् गणतन्त्रस्य समुद्भवस्य सूचना लभते ।

न्यायाधीशः न्यायस्य मूर्त्तिः तथा धर्मस्य रक्षकः आसीत् । सः सम्यक् विचार्य्य अपराधिनं दण्ड प्रददाति स्म । दुर्भाग्यवशतः वसन्तसेनायाः वधकरणे चारुदत्तस्यैव भूमिका अस्तीति विषये चारुदत्तस्य विपक्षे सर्वं प्रमाणं दृष्टत्वात् न्यायधीशः चारुदत्तं प्राणादण्डेन दण्डितम् अकरोत् । अस्मात् तदानीन्तनसमये दण्डव्यवस्था अतीव कठोरा आसीदिति ज्ञायते ।

(ज)नृत्यसङ्गीतकलादीनां प्रसारः -

समाजे नृत्यसङ्गीतादीनां समादरः दृश्यते। चारुदत्तः रेभिलमहोदयस्य सङ्गीतं मुर्हुमुहुः प्रशंसति तथाहि -

उत्कण्ठितस्य हृदयानुगुणा वयस्या
सङ्केतके चिरयति प्रवरो विनोदः।
संस्थापना प्रियतमा विरहातुराणां
रक्तस्य रागपरिवृद्धिकरः प्रमोदः ॥(मृ.प्र.-३/३)

चारुदत्तसय सखा विदूषकः अपि वसन्तसेनायाः सूक्ष्मकारुकार्यपरिपूर्णं श्रीसौन्दर्यविमण्डितं समुच्चप्रसादं वेश्यालयं असकृत् प्रशंसति। वसन्तसेनायाः प्रासादस्य सौन्दर्यं प्रकाशयितुं सः तस्याः प्रसादं धनपतिकुबेरभवनेन सह तुलयति। वसन्तसेनायाः प्रमोदवनमपि अतीव रमणीयमस्ति। तस्मात् तदानीन्तनसमाजे अवस्थितानां जनानां विलासमयजीवनयापनविषये सूचना लभते।

नाट्यकारभासस्य चारुदत्तमाधारीकृत्य कविः शूद्रकः एनं मृच्छकटिकप्रकरणं विरचितेऽपि अत्र कवेः मौलिकता-पाण्डित्य-कविप्रतिभादीनां सम्यक् परिस्फुटनं भवतीति।

## ४. मृच्छकटिकप्रकरणस्य नामकरणसार्थकतां प्रतिपादयत ?

किम्वा

## मृच्छकटिके प्रकरणस्य सर्वाणि लक्षणानि संगच्छन्ते वा न ?

शूद्रकेण विरचितम् 'मृच्छकटिकरूपकं प्रकरणान्तर्गतं भवति। प्रकरणस्य लक्षणं भवति –

''भवेत् प्रकरणे वृत्तं लौकिकं कविकल्पितम्।
शृङ्गारोऽङ्गी नायकस्तु विप्रोऽमात्योऽथवा वणिक् ॥
सापायधर्मकामार्थपरो धीरप्रशान्तकः।
नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित् ॥
तेन भेदास्त्रयस्तस्य तत्र भेदस्तृतीयकः।
कितवद्युतकारादिविटचेटकसंकुलः ॥

अर्थात् प्रकरणस्य कथावस्तु कल्पनाप्रसूतं लोककथामूलकं वा भवेत्।अस्य मुख्यरसः शृङ्गाररसः भवेत्। अस्य प्रकरणस्य नायकः ब्राह्मणः मन्त्री अथवा वणिक् भवेत्। अपि च नायकः विघ्नबहुलेषु धर्मः अर्थः कामश्चेति त्रिवर्गाहरणेषु तत्परः भवेत्। अस्य प्रकरणस्य नायिका कुत्र कुलजा भवेत्। कुत्र चापि वेश्या भवेत् कुत्रचिदपि कूलजावेश्योभये नायिके अवेताम् प्रकरणस्य नामकरणं नायकनायिकानुसारि भवेत्। नायकत्रयानुसारं नायिकात्रयानुसारं च प्रकरणं षट्प्रकारकं भवति। प्रकरणं विटचेटशकारप्रभृतिभिः परिपूर्णं भवेत्।

केवलं नामकरणं परित्यज्य एतानि सर्वाणि लक्षणानि मृच्छकटिकप्रकरणे संगच्छन्ते। अस्य प्रकरणस्य नायकः चारुदत्तः धीरप्रशान्तश्रेणीयः भवति। नायकः चारुदत्तः जात्या ब्राह्मणः भवति। परन्तु वृत्या वणिक् भवति। अस्य प्रकरणस्य मुख्यरसः शृङ्गाररसः भवति। अत्र नायकः धर्मप्रियः चारुदत्तः दानं कृत्वा कृत्वा दारिद्रः संजाते स्वदारिद्र्यं निन्दति। अस्मात् तस्य धनाहरणलिप्साविषये ज्ञायते। वसन्तसेनां प्रति तस्यानुरागः

तस्मिन् स्थितं कामभावं द्योतयति । अत्र नायिका उभये कुलजावेश्ये भवतः ।चारुदत्तस्य पत्नी धूता कुलजानायिका भवति ।चारुदत्तस्य प्रेमिका वसन्तसेना वेश्यानायिका भवति ।

अस्य प्रकरणस्य एकं विलक्षणं भवति यत् मृच्छकटिकप्रकरणस्य नामकरणं प्रकरणानुसारि न भूत्वा नाटकस्य लक्षणानुसारि भवति ।नाटकस्य लक्षणानुसारेण ''नामकार्यं नाटकस्य गर्भितार्थप्रकाशकम्'' भवति। अत्र शूद्रकस्य प्रकरणं भवभूतेः प्रकरणवत् मालतीमाधवमिति नायकनायिकयोः नामानुसारेण न भूत्वा गर्भितार्थं प्रकाशयति । मृत् शकटिकम्-मृच्छकटिकम् । नायकचारुदत्तस्य पुत्ररोहसेनस्य मृर्त्तिकानिर्मितशकटिकया क्रीडामवलम्ब्य अस्य प्रकरणस्य नामकरणं मृच्छकटिकम् भवति । सा च घटना एतादृशी विद्यते –

चारुदत्तस्य पुत्रो रोहसेनः प्रतिवेशिगृहस्य बालकस्य स्वर्णशकटिकया क्रीडित्वा गृहआगत्य तादृश्यै शकटिकायै रोदिति ।तदनुरोद्धुं रदनिका यदा मृच्छकटिकां तस्मै ददाति तदा ''किं मम एतेन मृत्तिकाशकटिकया तामेव सौवर्णशकटिकां देहि'' इति कथयित्वा पुनः रोदिति । अनन्तरं रदनिका रुदन्तं दारकं गृहीत्वाऽतिखिन्नमनस्का वसन्तसेनायाः सविधे गच्छति । वसन्तसेना च बालकस्य रोदनकारणं पृष्ट्वा ज्ञात्वा च वात्सल्यपरिप्लुता सन्ती स्वकीयान्याभरणानि बालकाय समर्पयन्ती ''सौवर्णशकटिकां घटय'' इति कथयति ।

अतोऽत्रागतमृच्छकटिकाप्रसंगेन अस्य प्रकरणस्य मृच्छकटिकमित्यभिधानमभिहितम् । मृत्-मृत्तिका शकटिका-लघुशकटम् । एवं मृदः (मृत्तिकायाः) शकटिका मृच्छकटिका, साऽस्त्यत्र वर्णितेति ''मृच्छकटिकं'' प्रकरणस्यान्वर्थनाम ।

अनेन नायकनायिकयोः गुणोत्कर्षः विधीयते । रोहसेनस्य मृर्त्तिकानिर्मितशकटिकया सह क्रीडया चारुदत्तस्य असीमदानाशीलतायाः परिचयः लभते । यः चारुदत्तः उज्जयिन्याः एकः सम्भ्रान्तः धनिकः आसीत्। सः संप्रति दानं कृत्वा कृत्वा संपूर्णः दारिद्रः संजातः । पुनश्च रोहसेनः यदा चारुदत्तस्य दास्यै मृर्त्तिकाशकटिकया क्रीडितुं अनिच्छन् सुवर्णशकटिकां प्रदातुं वारम्बारं कथयित्वा क्रन्दति । तदा तत्र वसन्तसेना प्रविश्य रोहसेनस्य क्रन्दनस्य कारणं ज्ञात्वा तस्मै स्वस्य शरीरस्य सर्वाणि अलङ्काराणि प्रदत्तवती । अनेन वसन्तसेनायाः महनीयतायाः परिचयःलभते । अस्मात्जायते यत्-वसन्तसेनायाः मनसि सपत्नीगतद्वेषः नासीत् । अतः सा सपत्नीपुत्राय रोहसेनाय स्वस्य सर्वाणि अलङ्काराणि प्रदत्य तेभ्यः अनङ्कारेभ्यःसुवर्णशकटिकां क्रेतुं निर्द्दिष्टवती। मुख्यतः गणिकावेश्याः धनप्रियाः भवन्ति । धनविनिमयेन ताः प्रेमभावं प्रकटयन्ति । परन्तु वसन्तसेनायाः चारुदत्तं प्रति स्थितः अनुरागः अमलिनः आसीत् । धनेच्छया सा चारुदत्ते न प्रीणयति ।अपि तु सा चारुदत्तस्य सद्गुणैः वशीभूता आसीत् इति ।

मृच्छकटिकप्रकरणे मुख-प्रतिमुख-गर्भ-विमर्श- उपसंहृतीति पञ्चसंधयः यथावत् सन्निवेशः भवन्ति । अस्य मुख्यरसः शृङ्गारः भूतेऽपि हास्यकरुणादयः अन्ये रसाः गौणरसरूपेण वर्त्तन्ते । तत्कालीनसामाजिकावस्था विषयेऽपि अत्र सम्यक् वर्णनं भवति । नायकः चारुदत्तः दरिद्रत्वात् अत्र दरिद्रतायाः एकं निच्छकचित्रं लभते ।

दशाङ्कविशिष्टे शूद्रकस्य अस्मिन् मृच्छकटिकं नाम प्रकरणे भासकृतनाटकचारुदत्तस्य कथावस्तुना सह देशप्रेमिणा आर्यकेण दुराचारिणः राज्ञः विताडनविषयं वर्णितं भवति । मृच्छकटिकं भासस्य दरिद्रचारुदत्तस्य परिष्कृतं वर्धितञ्च रूपमस्ति । तत्रापि दरिद्रचारुदत्ते चत्वारोऽङ्का विद्यन्ते । दरिद्रचारुदत्तं हि पूर्णं नास्ति । अवश्यमेवैकोऽङ्कः पञ्चमोऽपि तत्रासीदिति विदुषाम् अनुमितिः अस्ति । एवमत्र मृच्छकटिकस्य पञ्चमाङ्कपर्यन्तं कथानकं भासस्य अस्ति । षष्ठाङ्कादारभ्य विषयवस्तुनः कल्पना शूद्रकस्य अस्ति । षष्ठ एवाङ्के मृच्छकटिकस्य प्रसङ्गोऽस्ति । तस्मात् स्वकल्पनाम् आरम्भद्योतनयापि नायकनायिकानामत्यागपूर्वकं मृच्छकटिकं नाम स्थापितं प्रकरणस्येति साधु संगच्छते । अतः मृच्छकटिकं वास्तवतः एकं परिपूर्णाङ्गं सार्थकं प्रकरणं भवति ।

## ५. चारुदत्तस्य चरित्रचित्रणम्

मृच्छकटिकप्रकरणस्य नायकश्चारुदत्तोऽस्ति । 'नायकस्तु विप्रोऽमात्योऽथवा वणिक् । सापायधर्मकामार्थपरो धीरप्रशान्तकः ॥' इति प्रकरणस्य नायकानुरूपमेव चारुदत्तो जात्या ब्राह्मणो वृत्या तु वणिक् अस्ति । स च सुन्दर, युवा, दानवीरः, परोपकारी, गुणग्राही, उदारमना, सत्यवक्ता, धार्मिकः, आदर्शपतिः, आदर्शप्रेमिकः, आदर्शपिता, शरणागतवत्सलः, परमक्षमाशीलः, धीरप्रशान्तश्रेणीयः नायकोऽस्ति ।

### सौन्दर्यवान्

चारुदत्तः उज्जयिन्या अतिसम्पन्नवंशे अजायत । ब्राह्मणा अपि तत्पूर्वजा धनसञ्चयेन श्रेष्ठिषु स्थानं प्राप्ता आसन् । स्वविभवादिगुणैर्नागरिकैः प्राप्तसम्माना राजसम्बन्धिभिरपि कामयमाना अतुलनीयसौन्दर्य्यमयी वसन्तसेना चारुदत्तस्य रूपगुणादिभिः तं प्रति अनुरक्ता आसीत् । 'यस्तादृशः प्रियदर्शनः, न केवलं श्रुतिरमणीयो दृष्टिरमणीयोऽपि, घ्राणोन्नतं मुखमपाङ्गविशालनेत्रम्, सुनिक्षिप्तं खलु दारिकया यौवनम्, इत्यादि वचनैः ज्ञायते यत् चारुदत्तः कामदेवतुल्यः सुन्दर आसीत् । 'रन्तुमिच्छामि न सेवितुमिति वसन्तसेनोक्त्या च चारुदत्तस्य कामोपमं निसर्गसौन्दर्यसुधासमन्वितं यौवनं बलाद् वसन्तसेनामनो निर्मथ्य समर्पणाय विवशीकरोति ।

### दानवीरः

चारुदत्तस्य पूर्वपुरुषाः वाणिज्यव्यवसायमाध्यमेन प्रभूतं धनम् उपार्जनमकुर्वन् । अतः चारुदत्तस्य समीपे प्रभूता पैतृकसम्पत्तिः आसीत् । परन्तु सः दुःखीरोगीदरिद्रजनेभ्यः दानं कृत्वा सर्व धनं व्ययमकरोत् । फलतः सः सम्प्रति दारिद्र्यवस्थायां पत्नीपुत्राभ्यां सह कालातिपातं करोति । दारिद्र्यात् परिजनैः मित्रैश्च सः परित्यक्तः । तस्य गृहे अतिथयः अपि नागच्छन्ति । दरिद्रावस्थायां प्राप्तेऽपि तस्य दानशीलतागुणः अक्षुण्णः आसीत् । यदा वसन्तसेनायाः चेटः (दासः) खुण्टमोडुकाख्यं गजं हत्वा परिव्राजकम् अरक्षत् । तदा तस्य पराक्रमेण प्रसन्नः चारुदत्तः तस्मै पारितोषिकरूपेण स्वकीयशरीरे गृहीतं प्रावारकं प्राददात् । अनेन तस्य दानप्रियताविषये सम्यक् अनुमीयते ।

एषः मित्राणाममित्राणाञ्च कार्यसाधनार्थमेव आत्मनः सर्वं धनं त्यक्त्वा साम्प्रतं दरिद्रः वर्त्तते । एतेन स्वजीवने धनैः कोऽपि न अपमानितः । अस्य मनसि स्वल्पमपि धनमदः नास्ति । अयं सम्प्रति बहूनां जनानां रक्षां विधाय दरिद्रः जातः । तथा हि -

सोऽस्मद्विधानां प्रणयैः कृशीकृतो
न तेन कश्चिद् विभवैर्विमानितः ।
निदाघकालेष्विव सोदको ह्रदो
नृणां स तृष्णामपनीय शुष्कवान् ।

अपिच –

कृत्वा समुद्रमुदकोच्छ्रयमात्रशेषं दत्तानि येन हि धनान्यनपेक्षितानि ।
स श्रेयसां कथमिवैकनिधिर्महात्मा पापं करिष्यति धनार्थमवैरिजुष्टम् ॥९/२२

येन चारुदत्तेन निःस्पृहभावेन समुद्रोद्भूतसर्वरत्नानि सर्वाणि धनानि च याचकेभ्यो समर्पितानि । कल्याणानां एकमात्राश्रयः सः महानुभवः महनीयचरितः चारुदत्तः धनापहरणार्थं शत्रुणामपि न सेवितं नारीवधरूपं कुकर्म केन प्रकारेण करिष्यति ? इति अधिकरणिकवचनात् चारुदत्तस्य दानशीलताविषये ज्ञायते ।

## धर्मनिष्ठः

चारुदत्तः धर्मनिष्ठः व्यक्ति अस्ति । एषः मनसा वाचा कर्मणा च सर्वदा देवार्चने संलग्नः वर्तते । एतस्यानुसारेण सुपूजिताः देवा अवश्यमेव प्रसन्नाः जायन्ते । गृहस्थविधीनां श्रद्धया सम्पादनं आत्मनः प्रथमं कर्त्तव्यं मन्यते । अत एव एषः विदूषकं कथयति - 'वयस्य ! मा मैवम्, गृहस्थस्य नित्योऽयं विधिः ।

तपसा मनसा वाग्भिः पूजिताः बलिकर्मभिः ।
तुष्यन्ति शमिनां नित्यं देवता किं विचारितैः ॥

## आदर्शपतिः आदर्शप्रेमिकश्च

चारुदत्तः एकः आदर्शपतिः तथा एकः आदर्शःप्रेमिकः आसीत् । आदर्शपतिरूपेण सः वसन्तसेनासक्तः अपि स्वपत्नीं धूतां कूलवध्वाः सम्मानं ददाति । आदर्शप्रेमिकरूपेण सः वसन्तसेनां कदापि हतादरं न करोति । प्राणदण्डेन दण्डितः चारुदत्तः स्वपुत्रं मात्रा सह आश्रमे स्यातुमुपदिशति । येन मत्सदृशं युवां निर्दोषेन मृत्युं न लभेयाताम् । तथाहि -

आश्रमं वत्स ! मन्तव्यं गृहीत्वाऽद्यैव मातरम् ।

मा पुत्र ! पितृदोषेण त्वमप्येवं गमिष्यसि ॥

अस्मात् चारुदत्तस्य पुत्रे पत्न्यां च स्थितः अनुरागभावः स्पष्टं सूचितो भवति ।

## आदर्शपिता -

चारुदत्तः एकेन आदर्शपितारूपेण मृत्योः पूर्वं स्वपुत्रं रोहसेनं द्रष्टुं स्वाभिलाषं प्रकटितवान् ।

## संगीतकलाप्रेमी -

चारुदत्तः संगीतकलाप्रेमी अपि वर्त्तते । रेभिलस्य संगीतं श्रुत्वा तस्य मूर्च्छनादीनां विश्लेषणं कुर्वन् प्रशंसापूर्वकं कथयति । तथाहि -

रक्तं च नाम मधुरं च समं स्फुटं च

भावान्वितं च ललितं च मनोहरं च ।

किं वा प्रशस्तवचनैर्बहुभिर्मदुक्तै-

रन्तर्हिता यदिभवेद्वनितेति मन्ये ॥

## शरणागतवत्सलः -

चारुदत्तः शरणागतवत्सलः अपि आसीत् । सः अत्याचारिणः राज्ञः विपक्षे विद्रोहरतं आर्यकं शरणं प्राददात् । तथाहि -

विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः ।

अपि प्राणानहं जह्यां न तु त्वां शरणागतम् ॥७/६

अत्र चारुदत्तः आर्यकाय अभयदानं कृत्वा कथयति त्वं भाग्येन एव अत्रानीतः मम नेत्रयोः दृष्टिपथं समागतः । अतः अहं प्राणान् त्यजेयम् । परन्तु शरणागतं त्वां न परित्यजामि ।

अपि च प्राणभयेन समागतं शरणागतं अकारणशत्रुं स्वघातकं शकारमपि क्षमाशीलः सः शरणं प्रदाय तस्य जीवनं रक्षितवान् ।

## गुणवान्

चारुदत्तस्य सद्गुणस्य प्रभावात् विटचेटशकारप्रभृतयः दुर्जनाः तस्य गृहे प्रवेष्टुं बिभ्यति । उज्जयिन्यां वस्तुद्वयस्य प्रशस्तिः श्रूयते । प्रथमतः चारुदत्तस्य सद्गुणानां द्वितीयतः वसन्तसेनायाः अतुलनीयरूपस्य । तथाहि -

द्वावेव पूजनीयौ अत्र नगर्यां तिलकभूतौ च ।
आर्या वसन्तसेना धर्मनिधिश्चारुदत्तश्च ।।

एकेनैव श्लोकेन महाकविना शूद्रकेण विटमुखेन चारुदत्तस्य सकलगुणादीनां वर्णनं कृतम् । तथाहि -

दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुम्बी
आदर्शः शिक्षितानां सुचरितनिकषः शीलवेलासमुद्रः ।
सत्कर्ता नावमन्ता पुरुषगुणनिधिर्दक्षिणोदारसत्त्वो
ह्येकः श्लाघ्यः सः जीवत्यधिकगुणतया चोच्छ्वसन्तीव चान्ये ।।

अर्थात् एषः सर्वथाऽभिनन्दनीयचरितः महानुभवः विनीतः चारुदत्तः दरिद्रजनानां कृते स्वकीयै दयादाक्षिण्यादिगुणैः अवनतः कल्पवृक्षसदृशः आसीत् । अपि च सः सत्पुरुषाणां बन्धुः, विद्वज्जनानां निदर्शनरूपः, दयादाक्षिण्यादीनां सुचरितानां निकषपाषाणः इव मर्य्यादावान्, समादरकर्त्ता, नापमानकर्त्ता, औदार्यादीनां मानवोचितगुणानां निधिरूपः, दक्षिणोदारस्वभावविशिष्टः, अतिशय गुणशालित्वेन प्रशंसनीयः स्वसद्गुणैः अद्वितीयश्च आसीत् । अतः स एव जीवनस्य प्रकृतस्वादं आस्वादयति । अन्ये केवलं उच्छ्वं समात्रं नयन्ति ।

एवंरूपेण चारुदत्तस्य चरितं अतीव महनीयमस्ति ।

## ६. वसन्तसेनायाः चरित्रचित्रणम्

'नायिका कुलजा क्वापि वेश्या क्वापि द्वयं क्वचित्' इति प्रकरणस्य लक्षणानुसारं मृच्छकटिकप्रकरणे नायिकाद्वयं विद्यते । वेश्यानायिका कुलजानायिका च । ब्राह्मणी धूता भवति ब्राह्मणनायकचारुदत्तस्य कुलजानायिका, गणिकाकन्या वसन्तसेना भवति नायकचारुदत्तस्य वेश्यानायिका । नायिका वसन्तसेना क्रमेण अतुलनीयसौन्दर्य मयीरमणी, निर्मलहृदया, शुद्धचरित्रयुक्ता, सर्वगुणसंपन्ना, दयार्द्रहृदया, ममतामयी, आभूषणप्रिया, आदर्शप्रेमिका, सपत्नीद्वेषरहिता, नृत्यसङ्गीतविशारदा, मधुरभाषिणी, सत्यवादिनी, स्पष्टवादिनी, अहङ्कारशून्या, दानशीला, धर्मपरायणा च भवति ।

## अतुलनीयसौन्दर्यमयी

वसन्तसेनायाः अतुनलीयसौन्दर्यविषये प्रतिपादयितुं नाट्यकारेण उक्तम् -

अवन्तिपुर्यां द्विजसार्थवाहो युवा दरिद्रः किल चारुदत्तः ।
गुणानुरक्ता गणिका च यस्य वसन्तशोभेव वसन्तसेना ।। (प्रथमाङ्क श्लो.६)

अस्मात् श्लोकात् ज्ञायते यत् वसन्तसेना वसन्तश्री इव निसर्गसौन्दर्यशालिनी आसीत् ।

## निर्मलहृदया

वसन्तसेनायाः हृदयं अतीव निर्मलमासीत् । तस्याः निष्कपटहृदये ईर्ष्याद्वेषवञ्चकतादयः नासन् । चारुदत्तं प्रति तस्याः प्रेम यथा निःस्वार्थपरकमासीत् तथैव धूतारोहसेनयोः कृते तस्याः स्नेहः तथा अनाविलमासीत् । वेश्याकुले जाताऽपि सा परेभ्यः (अन्येभ्यः) प्रतारणार्थं अभिनयं न अकरोत् ।

## शुद्धचरित्रयुक्ता

वसन्तसेना यद्यपि जात्या गणिका आसीत् । वृत्या तु तथा नासीत् । तस्या चरित्रं निष्कलङ्कं प्रशंसनीयञ्च आसीत् । साधारणतः गणिकाः धनप्रियाः भवन्ति । परन्तु वसन्तसेना स्वचरित्रस्य समक्षे धनं न्युनमिति अगणयत् । यस्य प्रमाणं धूर्त्तशकारस्य प्रचुरधनरत्नानां प्रलोभनं वसन्तसेनया सदृढं प्रत्याख्यातम् ।

## सर्वगुणसंपन्ना

वसन्तसेनायाः समीपे सर्वविधाः सुगुणाः आसन् । सा दयाक्षमाममतादीनां साक्षात् प्रतिमूर्त्ति दानस्य प्रतिमा, प्रेम्नः निर्झरिणी, विनम्रतायाः पूजारिणी चासीत् । सा मधुरभाषिणी सत्यवादिनी स्पष्टवादिनी, अहङ्कारशून्या, दानशीला, धर्मपरायणा चासीत् । गणिकाकन्यारूपेण सा नृत्यगीतवाद्यादिभिः प्रवीणा आसीत् ।

## दयार्द्रहृदया

द्युतक्रीडायां पराजितः सन् स्वस्य सर्वस्वं अपहारयित्वा दशसुवर्णमुद्रां ऋण कृत्वा माथुरहस्तेन पाशबद्धः संवाहकः यदा पाशात् विमुक्तः सन् पलायितवान् । तदा संवाहकं माथुरः तस्य अनुचराश्च अनुसृतवन्तः । प्राणभयेन संवाहकः वसन्तसेनायाः प्रासादे प्राविशत् । तस्मिन् समये दयार्द्रहृदया वसन्तसेना स्वहस्ता भरणं प्रदाय संवाहकं ऋणमुक्तं कृतवती ।

## ममतामयी

वसन्तसेना आसीत् वात्सल्यममतायाः चिरप्रवाहमयी मन्दाकिनी । चारुदत्तसक्ता वसन्तसेना यदा चारुदत्तगृहे अतिष्ठत् । तदा चारुदत्तपुत्रः रोहसेनः सुवर्णशकटिकया क्रीडितुं क्रन्दितवान् । दासीरदनिकामुखात् रोहसेनस्य रोदनकारणं परिज्ञाय सा स्वस्य शरीरस्य सर्वाणि अलङ्काराणि सुवर्णशकटिकानिर्माणार्थं रदनिकायै प्रदत्तवती । यद्यपि रोहसेनः वसन्तसेनायाः सपत्नीपुत्रः आसीत् । तथापि रोहसेनं प्रति वसन्तसेनायाः एतादृशी वदान्यता रोहसेने तस्याः अनाविलममतां व्यक्तीकरोति ।

## आभूषण प्रिया

प्रत्येकनार्य्याः अलङ्कारं प्रति स्वतन्त्राकर्षणं दृश्यते । वसन्तसेना कथं वा अस्मात् विपरीतं भवेत् ? प्रथमाङ्के चारुदत्तस्य समीपे स्वस्य शरीरे गृहीतानि बहुमूल्य आभूषणानि न्यासरूपेण संस्थापनं, तथा रोहसेननिमित्तं सुवर्णशकटिकानिर्माणार्थं स्वशरीरस्य सकलाभूषणप्रदानं वसन्तसेनायाः आभूषणप्रियत्वं सूचयति ।

## आदर्श प्रेमिका

आदर्शप्रेमिकायाः ज्वलन्तं निदर्शनं भवति वसन्तसेना । चारुदत्तस्य प्राप्त्यर्थं सा बहुबाधाविघ्नादीनां सम्मुखिनी भूत्वा असकृत् प्रणयपरीक्षायां उत्तीर्णा जाता । यदा वसन्तसेना चारुदत्तं प्रति अनुरक्ता आसीत् । तदा चारुदत्तः धनधान्येषु परिपूर्णः सन् श्रेष्ठधनिकरूपेण समाजे ख्यातिं लब्धवान् । परन्तु समयक्रमेण चारुदत्तः दुखीदरिद्रेभ्यः स्वस्य सर्वं धनं दानं कृत्वा कृत्वा दरिद्रः संजातः । केवलं चारुदत्ते एव प्रणयं कुर्वन्ती वसन्तसेना चारुदत्तस्य एतादृशदरिद्रावस्थायामपि तस्मात् स्वमनः निवृत्तं न कृतववती । अधिकन्तु चारुदत्तस्य दानशीलतागुणेन विमुग्धा सन्ती सा चारुदत्तस्य अतिसमीपवर्त्तिनी भवितुं इच्छति स्म । साधारणतः वेश्या धनप्रिया भवति । परन्तु वसन्तसेना निःस्वार्थपरप्रेम्नः समक्षे धनं अतीव न्युनमासीत् । शकारस्य प्रभूतधनप्रलोभनमपि वसन्तसेनायाः मनः चारुदत्तात् पृथकीकृतं कर्त्तुं असमर्थमासीत् । चारुदत्तस्य स्वपत्नीं धूतां प्रति प्रभूतानुरागभावः, पुत्रः रोहसेनः, सर्वोपरि तस्यां उदासीनताऽभावश्च वसन्तसेनायाः प्रणयमार्गे प्रतिबन्धकं न अभवन् ।

प्रवहणविपर्ययेण दुर्भाग्यवशतः धूर्त्तशकारस्य हस्ते मुमुर्षु-अवस्थायां उपनीता सन्ती अन्ते बौद्धभिक्षुसंवाहकेना पुनर्जीवनं लब्ध्वा सा स्वस्याः आदर्शप्रिम्ना चारुदत्तं प्राप्तुं समर्था अभवत्, अपि च तस्य कूलवध्वाः सम्मानं अलभत ।

## सपत्नीद्वेषरहिता

वसन्तसेनायाः हृदये सपत्नीगतद्वेषः नासीत् । चारुदत्तस्य पत्नी धूतां प्रति तस्याः सम्मानभावः आसीत् । धूतापुत्ररोहसेनाय सा स्वपुत्रमिव वात्सल्यममतां प्रदत्तवती । चारुदत्तस्य धूतायां अनुरागं दृष्ट्वा सा ईर्ष्यान्विता न भवति । येन अन्ते वसन्तसेना चारुदत्तस्य द्वितीयपत्नी भूतेऽपि तस्य वैवाहिकजीननं दुःखाशान्तिमयं नाभवत् ।

वसन्तसेना स्वस्याः अतुलनीयसौन्दर्य्येण उज्जयिनीनगर्य्यां परिचिता आसीत् । तत्तु न । अपितु सा स्वस्य मधुरविनम्रव्यवहारेण निष्कपटहृदयेन दयाक्षमादानादिसुगुणैः अपि उज्जयिनीवासिनां सम्मानस्पदा आसीत् । तथा हि -

द्वावेव पूजनीयावत्र नगर्यां तिलकभूतौ च ।

आर्या वसन्तसेना धर्मनिधिश्चारुदत्तश्च ॥ (मृ - ६/१४)

## ८. शकारस्य चरित्रचित्रणम् ?

प्रकरणस्य लक्षणानुसारेण प्रकरणं शकारविटचेटादिसंकुलं भवेत् । अस्मिन् प्रकरणे अपि शकारः प्रतिनायकरूपेण अवतीर्णः । प्रथमाङ्के प्रतिनायकः शकारः नायिकावसन्तसेनायाः पश्चात्गमनं करोति । शकारः भवति राज्ञः रक्षितापत्न्याः अविवाहितभ्राता तथा राज्ञः श्यालकः । सः मूर्खः, गर्वोद्धतः तथा अभिमानी भवति । नीचकूलोत्पन्नः दुश्चरित्रः तथा ऐश्वर्यसंपन्नः भवति । तथाहि -

मूर्खताभिमानी दुष्कुलैश्वर्यसंयुक्तः ।

सोऽयमनुढाभ्राता राज्ञः श्यालः शकारः इत्युक्तः॥

इति साहित्यदर्पणलक्षणानुसारमेव मृच्छकटिकस्य शकारो मदमूर्खताभिमानानां मूर्त्तिः, तैरेवाचरणेन दुष्कुलैश्वर्यसंयोगस्य सहजमेव परिचयो भवत्यत्र शकारस्य । राज्ञो पालकस्यानूढायाः भ्रातप्यस्ति, अतो राजश्यालः । एवमहं राजश्याल इति सम्बन्धप्रभावेण सर्व-विशृङ्खलित-व्यवहारकरणेऽबाध इव दृश्यते । आत्मप्रशंसायां 'मां प्रवरपुरुषं मनुष्यं वासुदेवमिति' कथयति । प्रायोऽनर्गलपौराणिकाख्यानैरात्मनो बहुज्ञतां प्रकटयति । 'स्त्रीणां शतं मारयामि । शूरोऽहम्' इति स्वोक्त्यनुरूपमेव सर्वथाऽसमर्थेषु शूरः । एवं सर्वं हि तच्चरित्रं मूर्खतापूर्णं दुष्टतापूर्णञ्चैवावलोक्यते । 'सर्वमपि नश्यतु, प्राकारखण्डेन प्रवेशय प्रवहणम् । राजश्यालकोऽहम् गावौ मृतौ, अपरौ क्रेष्यामि । प्रवहणं भग्नम्, अपरं घटयिष्यामि । त्वं मृतः, अन्यः प्रवहणवाहको भविष्यति' इति कीदृशमनुपमं निदर्शनमस्ति शकारस्यातिमूर्खतायाः । एवमेव धूर्तचेष्टयाऽसहायां वसन्तसेनां मारयित्वा निरपराधं चारुदत्तञ्च तदपराधमारोप्य, न्यायलयेनापि तथैव साधयित्वा श्मशाने चारुदत्तस्य मृत्युदण्डार्थं दत्तहृदयः 'तत्प्रेक्षिष्ये शत्रुविनाशो नाम मम महान् हृदयस्य परितोषो भवति । श्रुतं च मया, यो हि किल शत्रुं व्यापाद्यमानं पश्यति तस्य जन्मान्तरे अक्षिरोगो न जायते इति कथयति । अपि च शीघ्रं मारणार्थं पुनः पुनः चाण्डालौ प्रेरयन् 'सपुत्रमेवैतं मारय' इति कथयति । तेन स्वप्रभावेण पैशून्यस्य सीमानमेवोल्लङ्घयति । एवं मूर्खतायाः कुटिलतायाश्च प्रतिमूर्तिरिवायम् । शकारः मुर्खः भूतेऽपि स्वं महाज्ञानी इति मन्यते । तस्य दृष्टान्तः वहुलतया प्रथमाङ्के परिदृश्यते । यथा -

किं भीमसेनो जमदग्निपुत्रः कुन्तीसुतो वा दशकन्धरो वा ।

एषोऽहं गृहीत्वा केशहस्ते दुःशासनस्यानुकृतिं करोमि ॥ -मृ-१/२९

अत्र शकारः मूर्खत्वात् पुराणसम्बन्धीज्ञानाभावे एवं उच्यते ।

अपि च-

एषऽसि वासु ! शिरसि गृहीत्वा केशेषु वालेषु शिरोरुहेषु ।

आक्रोश विक्रोश लपाधिचण्डं शम्भुं शिवं शंकरमीश्वरं वा ॥ -मृ- १/४१

अत्र मूर्खः शकारः केशस्य उच्चारणेन अर्थबोधः भूतेऽपि स्वमिव अन्यं मूर्खः इति मत्वा केशस्य पर्यायवाची शब्दाः बालः, शिरोरुहः इति उल्लिख्य स्वस्य मुर्खतायाः परिचयं प्रददाति ।

नाट्यकारः शूद्रकः शकारस्य वचनेषु रामायणमहाभारतपुराणादिकविषये उल्लेखं करोति । शकारः मूर्खत्वात् तस्य मुखेन नाट्यकारः रामायणमहाभारतादयः त्रुटिपूर्णभावेन वर्णयति । नोचेत् नाट्यकारस्य एतेषु विषयेषु प्रगाढज्ञानं आसीत् ।

## ८. चारुदत्तमृच्छकटिकयोस्तुलनात्मकमध्ययनम्

| चारुदत्तनाटकम् | मृच्छकटिकम् |
|---|---|
| १. चारुदत्तनाटकं महाकविभासस्य संपूर्ण मौलिकं तथा कल्पनाप्रसूतश्चास्ति । | १. नाट्यकारशूद्रकेण भासकृतं चारुदत्तनाटकमाधारीकृत्य एतत् मृच्छकटिकम् इत्याख्यं प्रकरणं विरचितम् । |
| २.चारुदत्तनाटके चत्वारः अङ्काः विद्यन्ते । | २.मृच्छकटिक प्रकरणे दशअङ्काः विद्यन्ते । |
| ३. चारुदत्तम् एकं नाटकम् । | ३. मृच्छकटिकम् एकं प्रकरणम् । |
| ४. चारुदत्ते चारुदत्तवसन्तसेनयोः प्रणयवृत्तान्तं वर्णितमस्ति । | ४. परन्तु मृच्छकटिके चारुदत्तवसन्तसेनयोः प्रणयवृत्तान्तेन सह आर्यकस्य सिंहासनप्राप्तिविषयः वर्णितमस्ति । |
| ५. चारुदत्ते चारुदत्तस्य पत्नी ब्राह्मणी अस्ति । | ५. मृच्छकटिके चारुदत्तस्य पत्नी धूता अस्ति । |
| चारुदत्ते चौरस्य नाम सज्जलकः अस्ति । | परन्तु मृच्छकटिके चौरस्य नाम शर्विलकः अस्ति |
| ६. चारुदत्तस्य पुरुष पात्राणि- सूत्रधारः, चारुदत्तः, विदूषकः मैत्रेयः, शकारः, विटः, चेटः, संवाहकः, कर्णपुरः, वर्धमानकः । स्त्रीपात्राणि - नटी, वसन्तसेना, ब्राह्मणी, रदनिका, मदनिका, विच्छित्तिका, चतुरिका । | ६. मृच्छकटिकस्य पुरुषपात्राणि- सूत्रधारः, चारुदत्तः, विदूषकः, मैत्रेयः, शकारः, विटः, चेटः स्थावरकः, संवाहकः, द्यूतकरः, माथुरः, दर्दुरकः, चारुदत्तसेवकः वर्धमानकः, शर्विलकः, वसन्तसेनाचेटः कर्णपूरकः, वेश्यापुत्रः बन्धुलः, वसन्तसेनासेवकः कुम्भीलकः,वसन्तसेनासहचरः, विटः, चारुदत्तपुत्रः रोहसेनः, गोपालपुत्रः आर्यकः, नगररक्षकः वीरकः, |

| | |
|---|---|
| | नगररक्षकः चन्दनकः, न्यायलयस्य शोधनकः शोधनकर्त्ता, न्यायाधीशः अधिकरणिकः, न्यायनिर्णये सहायकः श्रेष्ठी, लिपिकः कायस्थः । |
| | रङ्गमञ्चे अनुपस्थितानि पुरुषपात्राणि -चारुदत्तस्य मित्रम् जूर्णवृद्धः, उज्जयिन्याः राजा पालकः, विशिष्टः गायकः रेभिलः, आर्यकस्य राज्यप्राप्तिघोषकः महात्मा सिद्धः । |
| | स्त्रीपात्राणि - नटी, वसन्तसेना, धूता, रदनिका, मदनिका, वसन्तसेनामाता वृद्धा, वसन्तसेनापरिचारिका छत्रधारिणी । |
| ६. चारुदत्ते वसन्तसेना केवलं चारुदत्तस्य प्रेमिकारूपेणैव वर्त्तते । | ६. परन्तु मृच्छकटिके चारुदत्तस्य प्रेमिका वसन्तसेना अन्ते चारुदत्तस्य कुलवधूरूपेण स्वीकृताऽस्ति । |

चारुदत्तनाटकस्य कथावस्तु मृच्छकटिकस्य पञ्चमाङ्कपर्यन्तं कथावस्तुसहितं समानमस्ति । चारुदत्तनाटकस्य बहव श्लोकाः मृच्छकटिके अनुपदं उद्धृताः सन्ति ।

अन्ये प्रश्नाः यथा १) शर्विलकस्य चरित्रचित्रणं कुरुत ।
२) विदूषकस्य मैत्रेयस्य चरित्रं चित्रयत ।
इत्यपि परीक्षायां प्रष्टव्यं भवितुमर्हतः ।

## प्रथमोऽङ्कः

१. शून्यमपुत्रस्य गृहं चिरशून्यं नास्ति यस्य सन्मित्रम् ।
मूर्खस्य दिशः शून्याः सर्वं शून्यं दरिद्रस्य ॥१/८॥

अन्वयः – अपुत्रस्य गृहं शून्यं यस्य सन्मित्रं न अस्ति (तस्य) गृहं चिरशून्यं (अस्ति) मूर्खस्य दिशः शून्याः (सन्ति) दरिद्रस्य सर्वं शून्यं (भवति) ।

पदार्थः – अपुत्रस्य - पुत्ररहितस्य, गृहं - वासस्थानम्, शून्यं - रिक्तम्, इव भवति । यस्य - जनस्य, सन्मित्रं - सत्सखा, न - नहि, अस्ति - वर्तते, तस्य इति शेषः, गृहं - भवनम्, चिरशून्यम्, भवतीति शेषः । मूर्खस्य - अज्ञस्य, दिशः - सर्वाः काष्ठाः । शून्याः - निष्फलाः इति भावः, सन्तीति योजनीयम् । दरिद्रस्य - निर्धनस्य, सर्वं - निखिलं स्थानम्, शून्यं - रिक्तम्, भवतीति शेषः । अप्रस्तुतप्रशंसालङ्कारः । आर्याछन्दः ।

भावार्थः – नाट्यकारेण शूद्रकेण विरचितस्य मृच्छकटिकम् नाम प्रकरणस्य 'नायकः भवति चारुदत्तः । यः जात्या ब्राह्मणः वृत्त्या च वणिक् आसीत् । आदौ चारुदत्तः महान् धनिकः आसीत् । परन्तु तस्य दानशीलतागुणात् सः स्वस्य सर्वं धनं दानं कृत्वा दरिद्रः संजातः । दरिद्रचारुदत्तस्य मनस्तत्त्वविषये आलोकपातं कृत्वा नाट्यकारः शूद्रकः परोक्षभावेन दारिद्र्यवस्थायां गते जनस्य कीदृशी दशा भवति । तस्मिन् विषये सविशदं वर्णयति ।

इहलोके मनुष्यस्य धर्मार्थकामा इति त्रिवर्णाणां आवश्यकता अनुभूयते । परलोके तु मोक्षस्य आवश्यकता वर्त्तते । अर्थेन एव जनः धर्मकामौ लब्धुं समर्थः भवति । अतः शूद्रकेण चारुदत्तमुखेन सुष्ठुः उक्तम् सर्वं शून्यं दरिद्रस्य । अर्थात् अर्थं विना जनः संसारेऽस्मिन् एकपादमपि अग्रे अग्रेसर्त्तुं न समर्थः भवति ।

२. यासां बलिः सपदि मम गृहदेहलीनां हंसैश्च सारसगणैश्च विलुप्तपूर्वः ।
तास्वेव सम्प्रति विरूढतृणाङ्कुरासु बीजाञ्जलिः पतति कीटमुखावलीढः ॥१/९

अन्वयः – यासां मम गृहदेहलीनां बलिः सपदि हंसैः च सारसगणैः च विलुप्तपूर्वः सम्प्रति विरूढतृणाङ्कुरासु तासु एव कीटमुखावलीढः बीजाञ्जलिः पतति ।

पदार्थः – यासाम्, ममगृहदेहलीनां - मम चारुदत्तस्य गृहाणि भवनानि तेषां याः देहल्यः द्वारपीण्डिकाः तासाम्, बलिः - पूजाप्रयुक्ताक्षतादिद्रव्यम्, सपदि - झटिति, हंसैः च - मरालैः च, सारसगणैः - सारमानां पक्षिविशेषाणाम् गणैः समूहैः, विलुप्तपूर्वः - पूर्वं विलुप्तः भक्षितः, सम्प्रति - इदानीम्, विरुढतृणाङ्कुरासुः - विरूढाः संस्काराभावात् वृद्धिङ्गताः तृणाङ्कुराः शष्पाङ्कुराः यासु तासु, तासु - पूर्वोक्तासु गृहदेहलीषु, एव, कीटमुखावलीढः - कीटमुखैः कीटास्यैः अवलीढः खण्डितः, बीजाञ्जलिः - बीजानां तण्डुलादीनाम् अञ्जलिः समूहः, पतति - पतितः भवति । पर्यायालङ्कारः । वसन्ततिलकाच्छन्दः ।

भावार्थः – चारुदत्तस्य स्वभावस्तु आसीत् सर्वेभ्यः दानप्रदानकरणम् । धनिकावस्थायां चारुदत्तः उत्कृष्टभोज्यद्रव्यं बलिरूपेण प्रदत्तवान् । परन्तु संप्रति दरिद्रावस्थायां तथाऽसम्भवात् दुःखेन चारुदत्तः एवं कथयति पूर्वे मम गृहस्य द्वारपिण्डिकायां पूजाबलिरूपेण मया प्रदत्तं यत् अक्षतादिभोज्यद्रव्यं सहसा हंससारसादयः भक्षितवन्तः । तस्यां द्वारपिण्डिकायां अधुना दारिद्र्यात् पूजाबलिरूपेण मया यत् निकृष्टभोज्यद्रव्यं समर्पितम् । तत् निकृष्टं तृणाङ्कुरं भोक्तुं हंसाः सारसादयः नागच्छन्ति । अपि तु तत् निकृष्टं तृणाङ्कुर कीटादयः भक्षित्वा पुनरुद्गिरन्ति ।

३. **सुखं हि दुःखान्यनुभूय शोभते घनान्धकारेष्विव दीपदर्शनम् ।**

**सुखात्तु यो याति नरो दरिद्रतां धृतः शरीरेण मृतः स जीवति ॥१/१०**

**अन्वयः** – घनान्धकारेषु दीपदर्शनम् इव दुःखानि अनुभूय सुखं हि शोभते, यः नरः सुखात् दरिद्रतां याति सः शरीरेण धृतः मृतः (इव) जीवति ।

**पदार्थः** – घनान्धकारेषु - घनाः निविडाः अन्धकाराः तिमिराणि तेषु, दीपदर्शनम् इव - दीपप्रकाशः इव, दुःखानि - कष्टानि, अनुभूय- विज्ञान, सुखम्- आनन्दः हि- निश्चयेन शोभते - राजते, तु - किन्तु, यः नरः - मनुष्यः, सुखात् - आनन्दानुभवात्, पश्चादिति शेषः, दरिद्रतां - निर्धनताम्, याति - गच्छति, सः - पूर्वोक्तः जनः, शरीरेण - कायेन, धृतः - संयुक्तः अपि, मृतः - निष्प्राणः, इवेति शेषः, जीवति - प्राणान् धारयति । अप्रस्तुतप्रशंसा विरोधाभासश्चालङ्कारौ । वंशस्थं छन्दः ।

**भावार्थः** – साम्प्रतं भाग्यदोषात् अन्ये जनाः मामनुकम्पन्ते इति चिन्तितः सन् खेदमनुभवन् चारुदत्तः वदति – अन्धकारे यथा प्रदीपस्य आलोकः अत्यन्तं शोभते । तथैव दुःखादनन्तरं सुखलब्धः जनः तथा सुखावस्थां सादरं स्वीकरोति आनन्दितश्च भवति । परन्तु यः जनः सुखावस्थातः दुःखावस्थां लभते । सः शरीरं धृतेऽपि मृत इव प्रतीयते ।

४. **दारिद्र्यान्मरणाद्वा मरणं मम रोचते न दारिद्र्यम् ।**

**अल्पक्लेशं मरणं दारिद्र्यमनन्तकं दुःखम् ॥१/११**

**अन्वयः** – दारिद्र्यात् मरणात् वा मम मरणं रोचते, दारिद्र्यम् न । (यतः) मरणम् अल्पक्लेशं (अस्ति) दारिद्र्यम् अनन्तकं दुःखम् (अस्ति) ।

**पदार्थः** – दारिद्र्यात् - निर्धनत्वात्, मरणात् वा - जीवनत्यागात् वा, मम - चारुदत्तस्य, मरणं - मृत्युः, रोचते - प्रीणाति, दारिद्र्यं - निर्धनत्वम्, न - नहि, रोचते इति शेषः । यतः, मरणं - मृत्युः, अल्पक्लेशं - अल्पः लघुः क्लेशः दुःखं यस्मिन् तत्, अस्तीति शेषः, दारिद्र्यम् - निर्धनत्वम्, तु अनन्तकं दुःखं - जीवनपर्यन्तं दुःखपूर्णम्, अस्तीतिशेषः । काव्यलिङ्गमर्थान्तरन्यासश्चालङ्कारौ । आर्याच्छन्दः ।

**भावार्थः** – दारिद्र्यमरणयोः कतरत् तुभ्यं रोचते इति विदूषकस्य प्रश्नं समादधानो वदति चारुदत्तः – दारिद्र्यमरणयोः मह्यं मरणं अतीव रोचते । यतो हि मरणं स्वल्पदुःखंदायकं भवति । परन्तु दारिद्र्यं आजीवनं दुःखदायकं भवति ।

५. **एतत्तु मां दहति यद्गृहमस्मदीयं क्षीणार्थमित्यतिथयः परिवर्जयन्ति ।**

**संशुष्कसान्द्रमदलेखमिव भ्रमन्तः कालात्यये मधुकराः करिणः कपोलम् ॥१/१२**

**अन्वयः** – भ्रमन्तः मधुकराः कालात्यये संशुष्कसान्द्रमदलेखम् करिणः कपोलम् इव अतिथयः क्षीणार्थम् इति यत् अस्मदीयं गृहं परिबर्जयन्ति एतत् तु मां दहति ।

**पदार्थः** – भ्रमन्तः - इतस्ततः परिचरन्तः, मधुकराः - षट्पदाः, कालात्यये -समयापगमे, संशुष्कसान्द्रमदलेखं - संशुष्काः शोषं प्राप्ताः सान्द्राः निविडाः मदलेखाः मदप्रवाहरेखाः यस्मिन् तम्, करिणः - हस्तिनः, कपोलम् - गण्डस्थलम्, इव - यथा, अतिथयः - अभ्यागताः, क्षीणार्थम् इति - धनहीनम् इत्यम्, यत्, अस्मदीयं - मम, गृहं - वासस्थानम्, परिवर्जयन्ति - परित्यजन्ति, एतत् - अभ्यागतपरिवर्जनम्, तु - एव, मां - चारुदत्तम्, दहति - पीडयति । उपमालङ्कारः । वसन्ततिलकाच्छन्दः ।

भावार्थः – चारुदत्तः यदा धनी आसीत् । तदा अतिथयः धनलाभार्थं तस्य गृहं नित्यं आगच्छन्ति स्म । सम्प्रति दरिद्रचारुदत्तस्य समीपे दानं प्रदातुं किञ्चिदपि धनं नास्तीति परिज्ञाय कोऽपि जनः तस्य गृहं नागच्छन्ति । तदनुभूय चारुदत्तः कथयति - यथा मदजलेन आकर्षिताः सन्तः भ्रमराः गजस्य यत्कपोलदेशं परिवेष्टितवन्तः, सम्प्रति मदजलस्रावणाभावात् शुष्कं जाते गजस्य मदजलशून्यं तत्कपोलदेशं परितः भ्रमराः न भ्रमन्ति । तथैव अधुना धनहीनं मां निकषा अतिथयः धनप्राप्तिसम्भावनाभावात् नागच्छन्ति ।

६. **सत्यं न मे विभवनाशकृतास्ति चिन्ता भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।**
**एतत्तु मां दहति नष्टधनाश्रयस्य यत्सौहृदादपि जनाः शिथिलीभवन्ति ॥१/१३**

अन्वयः - सत्यं मे चिन्ता विभवनाशकृता न अस्ति, हि धनानि भाग्यक्रमेण भवन्ति यान्ति च, एतत् माम् दहति यत् जनाः नष्टधनाश्रयस्य सौहृदात् अपि शिथिलीभवन्ति ।

पदार्थ -सत्यं - वस्तुतः, मे - मम चारुदत्तस्य, चिन्ता - परितापभावना, विभवनाशकृता - विभवनाशेन धनक्षयेन कृता विहिता, न - नहि, अस्ति - वर्त्तते, हि - यतः, धनानि - सम्पत्तयः, भाग्यक्रमेण - दैवानुसारेण, भवन्ति - आगच्छन्ति, यान्ति - गच्छन्ति च । एतत्, माम् - चारुदत्तम्, दहति - पीडयति, यत्, जनाः - लोकाः, नष्टधनाश्रयस्य - नष्टः क्षीणः धनाश्रयः विभवाश्रयः यस्य तस्य, सौहृदात्, मित्रभावात् अपि, शिथिली भवन्ति - प्रयोजनाभावात् परित्यजन्ति । काव्यलिङ्गरूपकौ अलङ्कारौ । वसन्ततिलकाच्छन्दः ।

भावार्थ - अत्र चारुदत्तः कथयति अहं दरिद्रः संजातः, एतदर्थं मम मनसि दुःखं नास्ति । दुःखस्य कारणं तु एतत् यत् मम दारिद्र्यात् कदाचित् अहं बन्धून् धनभिक्षां करिष्यामि इति आशङ्क्य ते बन्धवः मम गृहं नागच्छन्ति नापि मया सह बन्धुतां संपादयन्ति ।

७. **दारिद्र्याद्धियमेति ह्रीपरिगतः प्रभ्रश्यते तेजसो**
**निस्तेजाः परिभूयते परिभवान्निर्वेदमापद्यते ।**
**निर्विण्णः शुचमेति शोकपिहितो बुद्ध्या परित्यज्यते**
**निर्बुद्धिः क्षयमेत्यहो निधनतां सर्वापदामास्पदम् ॥१/१४**

अन्वयः – (जनः) दारिद्र्यात् ह्रियम् एति, ह्रीपरिगतः तेजसः प्रभ्रश्यते, निस्तेजाः परिभूयते, परिभवात् निर्वेदम् आपद्यते, निर्विण्णः शुचम् एति, शोकपिहितः बुद्ध्या परित्यज्यते, निर्बुद्धिः क्षयम् एति, अहो ! निधनता सर्वापदाम् आस्पदम् ।

पदार्थः – जनः दारिद्र्यात् - निर्धनत्वात्, ह्रियम् - लज्जाम्, एति - गच्छति, ह्रीपरिगतः - ह्रिया लज्जया परिगतः आच्छन्नः, तेजसः - प्रतापात्, प्रभ्रश्यते - च्युतः भवति, निस्तेजाः - तेजविहीनः, परिभूयते - तिरस्क्रियते, जनैः इति योजनीयम्, परिभवात् - तिरस्कारात्, निर्वेदं - ग्लानिम्, आपद्यते - लभते, निर्विण्णः - ग्लानिसम्पन्नः, शुचम् - शोकम्, एति - गच्छति, शोकपिहितः - शोकेन पीडया पिहितः आविष्टः, बुद्ध्या - विवेकेन परित्यज्यते - विहायते, निर्बुद्धिः - बुद्धिहीनः, क्षयम् - नाशम्, एति - प्राप्नोति, अहो - आश्चर्यवाचकमव्ययम्, निधनता - दरिद्रता, सर्वापदां - सर्वासाम्, आपदां बिपदाम्, आस्पदम् - स्थानम्, अस्तीति शेषः । कारणमालालङ्कारः । शार्दूलविक्रीडितं छन्दः ।

भावार्थः – निर्धनस्य धनाभावात् सर्वेष्वपि कार्यकलापेष्वन्तरायः समापततीति विषये सूचयित्वा चारुदत्तः कथयति – दरिद्रजनः धनाभावात् लज्जां प्राप्नोति, लज्जाया युक्तः सः दरिद्रजनः प्रतापात् प्रभ्रष्टः भवति, तेजविहीनत्वात् अपमानं लभते । अपमानप्राप्तः सः ग्लानिम् अनुभवति । ग्लानियुक्तः जनः शोकमधिगच्छति, शोकातुरजनः विवेकात् च्युतः भवति, अन्ते अविवेकी तथा बुद्धिहीनजनः विनश्यति । अतः दारिद्र्यं हि सर्वासाम् आपदां मूलमस्ति ।

८. निवासश्चिन्तायाः परपरिभवो वैरमपरं

जुगुप्सा मित्राणां स्वजनजनविद्वेषकरणम् ।

वनं गन्तुं बुद्धिर्भवति च कलत्रात्परिभवो

हृदिस्थः शोकाग्निर्न च दहति सन्तापयति च ॥१/१५

**अन्वयः –** (दारिद्र्यं जनस्य) चिन्तायाः निवासः परपरिभवः अपरं वैरम्, मित्राणां जुगुप्सा, स्वजनविद्वेषकरणं च कलत्रात् परिभवः (भवति अतः) वनं गन्तुं बुद्धिः भवति च, हृदिस्थः शोकाग्निः न दहति (परं च दारिद्र्यम्) सन्तापयति च ।

**पदार्थः –** दारिद्र्यम्, चिन्तायाः - कथं मम निर्वाहः स्यादित्येवंरूपायाः, निवासः - आश्रयः, परपरिभवः - परेषाम् अन्येषां परिभवः तिरस्कारस्थानम्, अपरं - विलक्षणम्, वैरं - शत्रुभावः, मित्राणाम् - सुहृदाम् जुगुप्सा - घृणा, स्वजनविद्वेषकरणं - स्वजनानां बन्धुलोकानां विद्वेषकरणं - शत्रुभावहेतुः, च, कलत्रात् - भार्यायाः, परिभवः - तिरस्कारः, भवतीति योजनीयम्, अतएव, वनं - जङ्गलम्, गन्तुं - यातुम् बुद्धिः - मतिः भवति - जायते, हृदिस्थ - चित्ते वर्त्तमानः, शोकाग्निः - सन्तापवह्निः, दहति - न भस्मीकरोति, किन्तु, सन्तापयति - पीडयति । उल्लेखः रूपकश्चालङ्कारौ । शिखरिणीच्छन्दः ।

**भावार्थः –** दारिद्र्यात् दरिद्रजनस्य सांसारिकजीवनं अतीव दुःखपूर्णं भवति । प्रतिदिनं तस्य खाद्यवस्त्रवासगृहादीनां चिन्ता भवति । पदे पदे इतरजनात् अपमानं लभते । मित्राणि जुगुप्सन्ते, आत्मीयस्वजनाः धनं विनाः असन्तुष्टाः सन्तः द्वेषमाचरन्ति । धनं विना सांसारिकजीवनयात्रा अचला भवति । प्रतिक्षणं पत्नी स्वस्याः दरिद्रपतिं भर्त्सयति । तेन संसारं परित्यज्य संन्यासी भूत्वा वने स्थातुमिच्छा भवति । हृदयस्थः शोकाग्निः दरिद्रजनं न दहति, अपि तु तं प्रतिपदं पीडयति ।

९. तरुणजनसहायश्चिन्त्यतां वेशवासो विगणय गणिका त्वं मार्गजाता लतेव ।

वहसि हि धनहार्यं पण्यभूतं शरीरं सममुपचर भद्रे ! सुप्रियं चाप्रियं वा ॥१/३१

**अन्वयः –** वेशवासः तरुणजनसहायः चिन्त्यतां त्वं मार्गजाता लता गणिका विगणय, हि पण्यभूतं धनहार्यं शरीरं वहसि । (अत एव) हे भद्रे ! सुप्रियं वा अप्रियं वा समम् उपचर ।

**पदार्थः –** वेशवासः - वेशे वेश्यालये वासः निवासः, तरुणजनसहाय तरुणजनः युवजनः सहायः आश्रयः यस्य सः, चिन्त्यतां - विचार्यताम्, त्वं वेश्यावंशजा, वसन्तसेना, मार्गजाता - मार्गे पथि जाता उत्पन्ना, लता वल्लरी, इव - यथा, गणिका - वेश्या इति, विगणय - विचारय, हि - यतः, पण्यभूतं - विक्रेयस्वरूपम्, धनहार्यं - धनग्राह्यम्, शरीरं - देहम्, वहसि धारयसि । भद्रे - हे कल्याणि ! सुप्रियं वा - अभिप्सितं वा, अप्रियम् अनभीष्टम्, जनमिति शेषः, सम - तुल्यम्, उपचर - सेवस्व । उपमाकाव्यलिङ्गश्चालङ्कारौ । मालिनीच्छन्दः ।

**भावार्थः –** वसन्तसेनावचनं वेश्याजनविरुद्धमस्तीति विषये विटः कथयति – हे वसन्तसेने ! वेश्याजनवासस्थानं युवकजनाश्रितं भवति । वेश्याजनः पण्यभूतं शरीरमेव धारयति । धनविनिमयेन सः वेश्याजनः स्वस्य शरीरं विक्रयं करोति । अतः वेश्याजनः प्रियजनं प्रति यथा व्यवहारं करोति अप्रियजनं प्रति तथा व्यवहारं कुर्य्यात् । वेश्याजनस्य समीपे उभौ प्रियाप्रियजनौ समानौ भवेताम् । मार्गे उत्पन्ना लता यथा सर्वेषां प्रियाप्रियाणां कृते समर्पिता दृश्यते । तथैव हे भद्रे ! त्वं वेश्यात्वात् प्रियं चारुदत्तं प्रति यथा व्यवहरति, अप्रियं शकारं प्रत्यपि तथा व्यवहर ।

१०. वाप्यां स्नाति विचक्षणो द्विजवरो मूर्खोऽपि वर्णाधमः
फुल्लां नाम्यति वायसोऽपि हि लतां या नामिता बर्हिणा
ब्रह्मक्षत्रविशस्तरन्ति च यया नावा तयैवेतरे
त्वं वापीव लतेव नौरिव जनं वेश्यासि सर्वं भज ॥१/३२

अन्वय : — विचक्षणः द्विजवरः वर्णाधमः मूर्खः अपि वाप्यां स्नाति । वर्हिणा नामिता, फुल्लां लतां वायसः अपि नाम्यति, हि यया नावा ब्रह्मक्षत्रविशः तरन्ति तया एव इतरे च, त्वं वेश्या असि (अतएव) वापी इव लता इव नौ इव सर्वं जनं भज ।

पदार्थः — विचक्षणः - पण्डितः, द्विजवरः - ब्राह्मणश्रेष्ठः, वर्णाधमः - शूद्रः, मूर्खः अपि, वाप्यां - दीर्घिकायाम्, स्नाति - स्नानं करोतिः, या - लता, वर्हिणा - मयूरेण, नामिता - आक्रान्ता, फुल्लां - विकसिताम्, तामेव, लतां - वल्लरीम् वायसः - काकः, अपि, नाम्यति - नमयति, हि - प्रसिद्धमिदम्, यया - हेतुभूतया, नावा - तरण्या, ब्रह्मक्षत्रविशः - ब्राह्मणक्षत्रियवैश्याः, तरन्ति - पारं गच्छन्ति, तया - नावा, एव, इतरे - शूद्राः, च - अपि, पारं गच्छन्ति इतिशेषः, त्वं - वसन्तसेना, वेश्या - गणिका, असि - वर्तसे, (अतएव) वापी इव - दीर्घिका यथा, लता इव - वल्लरी यथा, नौ इव तरणी यथा, सर्वं - सम्पूर्णम्, जनं - लोकम्, भज - सेवस्व । मालोपमाकाव्यलिङ्गश्चालङ्कारौ । शार्दूलविक्रीडितं छन्दः ।

भावार्थः — वसन्तसेनावचनं वेश्याजनविरुद्धमस्तीति पुनः समर्थयन् विटः कथयति — वाप्यां विचक्षणबुद्धिसम्पन्नः विद्वान्, ब्राह्मणश्रेष्ठः, वर्णेषु हीनः चाण्डालः, मूर्खश्चेति सर्वे स्नानं कुर्वन्ति । विकशिता लता मयूरेण न केवलं अवनता भवति, अपि च काकेनापि अधःकृता दृश्यते । येन प्रकारेण नौकया ब्राह्मणक्षत्रियवैश्याः तरन्ति, तेन प्रकारेण शूद्रचाण्डालादयः अपि तरन्ति । अतः हे वसन्तसेने ! त्वं वापीव लतेव नौरिव सकलं जनं सेवस्व ।

११. दारिद्र्यात्पुरुषस्य बान्धवजनो वाक्ये न सन्तिष्ठते
सुस्निग्धा विमुखीभवन्ति सुहृदः स्फारीभवन्त्यापदः ।
सत्त्वं ह्रासमुपैति शीलशशिनः कान्तिः परिम्लायते
पापं कर्म च यत्परैरपि कृतं तत्तस्य सम्भाव्यते ॥१/३६

अन्वयः — दारिद्र्यात् ब्रान्धवजनः पुरुषस्य वाक्ये न सन्तिष्ठन्ते सुस्निग्धाः सहृदः विमुखीभवन्ति, आपदः स्फारीभवन्ति, सत्त्वं ह्रासं उपैति शीलशशिनः कान्तिः परिम्लायते, च यत् पापं कर्म परैः अपि कृतम् तत् तस्य सम्भाव्यते ।

पदार्थः — दारिद्र्यात् - निर्धनत्वात्, बान्धवजनः - सुहृल्लोकः, पुरुषस्य - दरिद्रव्यक्तेः, वाक्ये - वचने, न सन्तिष्ठते - नहि चलति, वचनं नहि पालयतीत्यर्थः । सुस्निग्धाः - अतिस्नेहयुक्ताः, सुहृदः - मित्रजनाः विमुखीभवन्ति - विमुखाः उदासीनाः भवन्ति जायन्ते, आपदः - विपत्तयः स्फारीभवन्ति - वर्धन्ते, सत्त्वं - वलम्, ह्रासम् - अवनतिम्, उपैति - गच्छति शीलशशिनः - शीलः चरित्रं एव शशी चन्द्रः तस्य, कान्ति - दीप्तिः, परिम्लायते - मलिनं भवति, च - किञ्च, यत्, पापं - पापकर्म, परैः - अन्यैः जनैः, कृतं - विहितम्, तत् - अन्यजनकृतं पापम्, तस्य - दरिद्रपुरुषस्य सम्भाव्यते अनुमीयते । रूपकालङ्कारः । शार्दूलविक्रीडित छन्दः ।

भावार्थः – दारिद्र्यात् दरिद्रजनस्य परिवारजनः आत्मीयस्वजनश्चेति तस्याज्ञोल्लंघनं कुरुतः । स्नेहशीलाः बन्धुजनाः विमुखाः सन्तः प्रतिकुलं आचरन्ति पराङ्मुखाश्च भवन्ति । विपत्तयः अनुदिनं बुद्धिं गच्छन्ति । वलं ह्रसति । चारित्ररूपचन्द्रे कलङ्कः लगति, इतरजनैः कृतं पापकर्म अस्य दरिद्रिजनस्य कृतिरिति सर्वे अपवादं ददति ।

१२. **सङ्गं नैव हि कश्चिदस्य कुरुते सम्भाषते नादरात्**

**सम्प्राप्तो गृहमुत्सवेषु धनिनां सावज्ञामालोक्यते ।**

**दूरादेव महाजनस्य विहरत्यल्पच्छदो लज्जया**

**मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥१/३७**

अन्वयः – हि कश्चित् अस्य सङ्गं न एव कुरुते, आदरात् न सम्भाषते उत्सवेषु धनिनां गृहं सम्प्राप्तः सावज्ञः( आलोक्यते, अल्पच्छदः (दरिद्रः लज्जया महाजनस्य दूरात् एव विहरति, (अत एव) मन्ये, निर्धनता अपरं प्रकामं षष्ठं महापातकम् (अस्ति) ।

पदार्थः – हि - यतः, कश्चित् - कोऽपि जनः, अस्य - निर्धनस्य जनस्य, सङ्गं - सम्पर्कम्, नैव कुरुते - नैव विदधाति, आदरात् सम्मानात्, न - नहि, सम्भाषते - वदति, उत्सवेषु - शुभावसरेषु, धनिनां - धनयुक्तानाम्, गृहं - भवनम्, सम्प्राप्तः - गतः, सावज्ञं - अवज्ञा तिरस्कारेण सहितम्, आलोक्यते - विलोक्यते, अल्पच्छदः - अतिस्वल्पवस्त्रः निर्धनः, लज्जया - ह्रिया, महाजनस्य - धनिनः, दूरात्, एव, विहरति - गच्छति, मन्ये - अहं स्वीकरोमि, निर्धनता - दारिद्र्यम्, अपरम् - अन्यत्, प्रकामं - प्रवृद्धम्, षष्ठं - ब्राह्मण हत्यादिपञ्चप्रकारातिरिक्तम्, महापातकं - वृहत्पातकम्, अस्तीति शेषः । उत्प्रेक्षालङ्कारः । शार्दूलविक्रीडित छन्दः ।

भावार्थः – दरिद्रेण सह कोऽपि जनः मित्रतां न स्थापयति, नापि सस्नेहं सम्भाषणं करोति । धनिकानां उत्सवे योगदानार्थं गतः दरिद्रजनः सर्वैः अपमानमेव लभ्यते । अल्पच्छिद्रयुक्तं वस्त्रधारितं दरिद्रजनं धनिकः अवज्ञादृष्ट्या हेयदृष्ट्या च आलोक्यन्ति । अतः दारिद्र्यं षष्ठं महापापमिति अहं मन्ये इति चारुदत्तः विदूषकस्य समक्षे प्रकाशयति ।

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।

महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥

एतानि पञ्चमहापातकानि सन्ति । नाट्यकारस्य शूद्रकस्य मतेन दारिद्र्यं भवति षष्ठं महापातकम् ।

१३. **दीनानां कल्पवृक्षः स्वगुणफलनतः सज्जनानां कुटुम्बी**

**आदर्शः शिक्षितानां सुचरितनिकषः शीलवेलासमुद्रः ।**

**सत्कर्ता नावमन्ता पुरुषगुणनिधिर्दक्षिणोदारसत्त्वो**

**ह्येकः श्लाघ्यः सः जीवत्यधिकगुणतया चोच्छ्वसन्तीव चान्ये ॥१/४८**

अन्वयः – दीनानां स्वगुणफलनतः कल्पवृक्षः सज्जनानां कुटुम्बी, शिक्षितानाम् आदर्शः, सुचरितनिकषः, शीलवेलासमुद्रः सत्कर्त्ता, न अवमन्ता पुरुषगुणनिधिः दक्षिणोदारसत्त्वः हि अधिकगुणतया श्लाघ्यः एकः सः जीवति अन्ये उच्छ्वसन्ति इव च ।

पदार्थः – दीनानां - दरिद्राणां, स्वगुणफलनतः - स्वस्य आत्मनः गुणाः दयादाक्षिण्यादिगुणाः एव फलानि परिणामाः तै नतः नम्रः कल्पवृक्षः - कल्पतरुः, सज्जनानां - सत्पुरुषाणाम्, कुटुम्बी - बन्धुः, शिक्षितानां - विद्वज्जनानाम्, आदर्शः - निदर्शनरूपः, सुचरितनिकषः - सुचरितानां - दयादाक्षिण्यादीनां निकषः परीक्षापाषाणः, शीलवेलासमुद्रः - शीलं सद्वृत्तं एव वेला सीमा तस्याः समुद्रः सागरः सत्कर्त्ता - समादरकर्त्ता, न अवमन्ता - न अपमानकर्त्ता, पुरुषगुणनिधिः - पुरुषगुणानाम्, औदार्यादीनां निधिः कोशः, दक्षिणोदारसत्त्वः - दक्षिणं सरलम् उदारं महत् च सत्त्वं स्वभावः यस्य सः, हि - निश्चितम्, अधिकगुणतया - अन्यजनातिशायिगुणशालित्वेन, श्लाघ्यः प्रशंसनीयः, एकः - अद्वितीयः, सः - पूर्वोक्तः चारुदत्तः जीवति - सफलं प्राणान् धारयति, अन्ये - इतरे जनाः, उच्छ्वसन्ति - उच्छ्वासं कुर्वन्ति, इव - यथा । उल्लेखालङ्कारः । स्रग्धराच्छन्दः ।

भावार्थः – एषः सर्वथाऽभिनन्दनीयचरितः महानुभवः विनीतः चारुदत्तः दरिद्रजनानां कृते स्वकीयै दयादाक्षिण्यादिगुणैः अवनतः कल्पवृक्षसदृशः आसीत् । अपि च सः सत्पुरुषाणां बन्धुः, विद्वज्जनानां निदर्शनरूपः, दयादाक्षिण्यादीनां सुचरितानां निकषपाषाणः इव । मर्य्यादावान्, समादरकर्त्ता, नापमानकर्त्ता, औदार्यादीनां मानवोचितगुणानां निधिरूपः दक्षिणोदारस्वभावविशिष्टः, अन्यजनातिशायियिगुणशालित्वेन प्रशंसनीयः स्वसद्गुणैः अद्वितीयश्च आसीत् । अतः स एव जीवनस्य प्रकृतस्वादं आस्वादयति । अन्ये केवलं उच्छ्वासमात्रं कुर्वन्तीति । एवंरूपेण चारुदत्तस्य चरितं अतीव महनीयमस्ति ।

१४. **अन्धस्य दृष्टिरिव पुष्टिरिवातुरस्य मूर्खस्य बुद्धिरिव सिद्धिरिवालसस्य ।**

**स्वल्पस्मृतेर्व्यसनिनः परमेव विद्या त्वां प्राप्य सा रतिरिवारिजने प्रनष्टा ॥१/४९**

अन्वयः – सा त्वां अन्धस्य दृष्टिः इव, आतुरस्य पुष्टिः इव मूर्खस्य बुद्धिः इव, अलसस्य सिद्धिः इव, अल्पस्मृतेः व्यसनिनः परमा विद्या इव, अरिजने रतिः इव प्रनष्टा ।

पदार्थः – सा - वसन्तसेना, त्वां - शकारम्, प्राप्य - लब्ध्वा, अन्धस्य - दर्शनशक्तिरहितस्य पुरुषस्य, दृष्टिः इव - दर्शनशक्ति यथा, आतुरस्य - व्याधिपीडितस्य, पुष्टिः इव - शरीरशक्तिः यथा, मूर्खस्य - विवेकहीनस्य, बुद्धिः इव - विवेकसामर्थ्यम् इव, अलसस्य - मन्दस्य, सिद्धिः इव - कार्यसाफल्यम् इव, अल्पस्मृतेः - अल्पा क्षीणा स्मृतिः स्मरणशक्तिः यस्य तस्य, व्यसनिनः - दुर्गुणासक्तस्य, परमा - श्रेष्ठा, विद्या इव - ज्ञानम् इव, अरिजने - शत्रुलोके, रतिः इव - अनुरागः इव, प्रनष्टा - अदर्शनं गता । मालोपमालङ्कारः । वसन्ततिलकाच्छन्दः ।

भावार्थः - वसन्तसेना कथमिव नष्टेति शकारप्रश्नस्योत्तरं विटः ददाति – वसन्तसेना नेत्रहीनस्य दृष्टिरिव, रोगिणः दैहिकशक्तिरिव, अज्ञस्य प्रज्ञेव, अलसस्य सफलतेव, क्षीणस्मृतिशक्तिकस्य दुर्व्यसनासक्तस्य उत्कृष्टा विद्येव, शत्रुजने अनुरागः इव प्रनष्टा ।

१५. **उदयति हि शशाङ्कः कामिनीगण्डपाण्डु-**

**ग्रहगणपरिवारो राजमार्गप्रदीपः ।**

**तिमिरनिकरमध्ये रश्मयो यस्य गौराः**

**स्रुतजल इव पङ्के क्षीरधाराः पतन्ति॥१/५७**

अन्वयः – हि कामिनीगण्डपाण्डुः ग्रहगणपरिवारः राजमार्गप्रदीपः शशाङ्कः उदयति, यस्य गौराः रश्मयः स्रुतजले पङ्के क्षीराधाराः इव तिमिरनिकरमध्ये पतन्ति ।

पदार्थः -- हि - यतः, कामिनीगण्डपाण्डुः - कामिन्याः तरुण्याः गण्डः कपोलः तद्वत् पाण्डुः - गौरवर्णः, ग्रहगणपरिवारः - ग्रहगणाः नक्षत्रसमूहाः एव परिवारः सहचरसमूहः यस्य सः, राजमार्ग प्रदीपः - राजमार्गस्य राजपथस्य प्रदीपः प्रकाशकः शशाङ्कः - चन्द्रः, उदयति - उदेति, यस्य - चन्द्रस्य, गौराः - श्वेतवर्णाः,रश्मयः - किरणाः, सुतजले - सुतं शुष्कं जलं नीरम् यस्मात् तस्मिन्, पङ्के - कर्दमे, क्षीरधाराः इव - दुग्धप्रवाहाः यथा, तिमिरनिकरमध्ये - अन्धकारसमूहाभ्यन्तरे पतन्ति - अन्धकारं विनाशयन्ति । लुप्तोपमारुपकश्चालङ्कारौ । मालिनीच्छन्दः ।

भावार्थः - प्रदीपिकानमिदानीं नास्त्यावश्यकतेति चन्द्रोदयं वर्णयन् चारुदत्तः कथयति – कामिन्याः कपोलः इव पाण्डुरवर्णः ग्रहनक्षत्रादिरूपपरिवारेण सह राजपथस्य प्रदीपः चन्द्रः उदेति । यस्य शुभ्रकिरणाः जलशून्ये कर्दमे दुग्धधाराः इव पतित्वा अन्धकारं विनाशयन्ति ।

१६. राजमार्गो हि शून्योऽयं रक्षिणो सञ्चरन्ति च ।

वञ्चना परिहर्तव्या वहुदोषा हि शर्वरी ॥१/५८

अन्वयः – हि, अयं राजमार्गः शून्यः रक्षिणः च सञ्चरन्ति, वञ्चना परिहर्तव्या, हि शर्वरी वहुदोषा (भवति) ।

पदार्थः – हि - यतः, अयम् - आवाभ्यां गमनीयः, मार्गः - राजपथः, शून्यः - निर्जनः, रक्षिणः च - रक्षकपुरुषाः च, सञ्चरन्ति - इतस्ततः परिभ्रमन्ति, वञ्चना - प्रतारणा, परिहर्तव्या - निवारणीया, हि - यतः, शर्वरी - रात्रिः, वहुदोषाः - वहवः अनेके दोषाः उपद्रवाः यस्यां सा, भवति इति योजनीयम् । अर्थान्तिरन्यास अलङ्कारः । पथ्यावक्त्रः छन्दः ।

भावार्थः – वसन्तसेनायां स्वगेहमुपगतायां स्वगेहेऽस्माभिरपि गन्तव्यमिति चारुदत्तः कथयति – यतो हि राजपथः शून्यः । शून्यराजपथे केवलं रक्षिणः विचरन्ति । चौर्यादिभ्यः रक्षणीया । यतः शर्वरी बहुदोषयुक्तः भवति ।

## द्वितीयोऽङ्कः

१७. यः आत्मवलं ज्ञात्वा भारं तुलितं वहति मनुष्यः ।

तस्य स्खलनं न जायते न च कान्तारगतो विपद्यते ॥२/१४

अन्वयः – यः मनुष्यः आत्मवलं ज्ञात्वा तुलितं भारं वहति तस्य स्खलनं न जायते, कान्तारगतः च न विपद्यते ।

पदार्थः – यः मनुष्यः - यः जनः, आत्मवलं - आत्मनः स्वस्य वलं सामर्थ्यम्, ज्ञात्वा - विचार्य, तुलितं - स्वानुरूपम्, भारं - गुरुद्रव्यम्, वहति - नयति, तस्य - पूर्वोक्तस्य नरस्य, स्खलनं - पतनम्, न जायते - नहि भवति, कान्तारगतः - कान्तारे गहने वने गतः यातः च - अपि, न विपद्यते - नहि विपत्तिमाप्नोति । अप्रस्तुतप्रशंसालङ्कारः । आर्याछन्दः ।

भावार्थः – ये जनाः आत्मनः सामर्थ्यमसामर्थ्यं वा ज्ञात्वा भारं तोलयति सः भयङ्करेऽपि मार्गे गच्छन् न स्खलति इत्याह संवाहकः । ये जनाः आत्मनः सामर्थ्यमसामर्थ्यं वा ज्ञात्वा भारं तोलयति सः भयङ्करेऽपि मार्गे गच्छन् न स्खलति इत्याह संवाहकः ।

१८. सत्कारधनः खलु सज्जनः कस्य न भवति चलाचलं धनम् ।

यः पूजयितुमपि जानाति स पूजाविशेषमपि जानाति ॥२/१५

अन्वयः – सत्कारधनः सज्जनः (भवति) खलु कस्य धनं चलाचलं न भवति । यः पूजयितुम् अपि न जानाति अपि सः पूजाविशेषं जानाति ।

पदार्थः – सत्कारधनः - सत्कारः अन्येषां सम्मानः एव धनं सम्पत्ति यस्य सः, सज्जनः - सत्पुरुषः, भवतीति शेषः । खलु - निश्चितमेव, कस्य कस्य पुरुषस्य, धनं - सम्पत्तिः, चलाचलं न भवति - नहि अस्ति यः - पुरुषः, पूजयितुम् - अन्यं जनं सत्कर्तुम्, अपि जानाति - अवबोधयति, अपि - प्रश्ने । सः - जनः, पूजाविशेषं - पूजायाः सत्कारस्य विशेषं प्रकारभेदम्, जानाति - अवगच्छति । अप्रस्तुतप्रशंसालङ्कारः । वैतालीयः छन्दः ।

भावार्थः - संवाहकः वसन्तसेनायाः समाधानं कर्तुं चारुदत्तस्य गुणानां प्रशंसां करोति । सत्पुरुषः परेषां सम्मानमेव स्वधनं मन्यते । यतो हि यस्य कस्यापि समीपे यत् पार्थिवधनमस्ति । तत् सर्वं धनं क्षयशीलं भवति । परन्तु सत्कारधनं सदैव अक्षयं भवति । अपि च यः जनः समागतस्य सत्कारं कर्तुं जानाति, सः जनः समागतस्य प्रकारभेदमपि जानाति ।

## तृतीयोऽङ्कः

१९. सस्यलम्पटबलीवर्दो न शक्यो वारयितु-

मन्यकलत्रप्रसक्तो न शक्यो वारयितुम् ।

द्यूतप्रसक्तमनुष्यो न शक्यो वारयितुं

योऽपि स्वाभाविकदोषो न शक्यो वारयितुम् ॥३/२

अन्वयः – सस्यलम्पटवलीवर्दः वारयितुं न शक्यः अन्यकलत्रप्रसक्तः वारयितुं न शक्यः, द्यूतप्रसक्त मनुष्यः वारयितुं न शक्यः, यः अपि स्वाभाविकदोषः वारियतुं न शक्यः ।

पदार्थः – सस्यलम्पटवलीवर्दः - सस्यलम्पटः सस्यभक्षणे लोलुपः यः वलीवर्दः वृषभः, वारयितुम् - अवरोद्धुम्, न शक्यः, अन्यकलत्रप्रसक्तः - अन्येषां - परेषां कलत्रेषु स्त्रीषु प्रसक्तः आसक्तः, पराङ्गनासम्भोगे सुखातिशयं मन्यमानः जनः इत्यर्थः, वारयितुं - निरोद्धुम्, न शक्यः, द्यूतप्रसक्तमनुष्यः - द्यूते द्यूतक्रीडायां प्रसक्तः संलग्नः मनुष्यः नरः, वारयितुम् - अवरोद्धुम्, न शक्यः यः अपि स्वाभाविकदोषः - स्वाभाविकः प्रकृतिदत्त दोषः अवगुणः, वारयितुं - निरोद्धुं न शक्यः । अप्रस्तुतप्रशंसा दृष्टान्तश्चालङ्कारौ । शक्वरीच्छन्दः ।

भावार्थः – यद्यपि आर्यः चारुदत्तः निर्धनस्तथापि सङ्गीतादिकलास्वद्यापि प्रीत्यतिशयं दानेऽभिरुचिञ्च धत्ते, इत्यहमनुचितं मन्ये इति चेटः कथयति –.हरितधान्यानाम् भक्षणे लोलुपः वृषभः स्वं अवरोद्धुं, अन्यस्य पत्न्यां अनुरक्तः जनः स्वं वारयितुं, अक्षक्रीडायाम् आसक्तः जनः स्वं निवारयितुं न समर्थः अस्ति । एवमेव यो कश्चनापि स्वाभाविकः प्रकृतिसिद्धदोषः दुर्गुणः वा अस्ति, तत्दोषं दुर्गुणं वा वारयितुं जनः सर्वथा असमर्थः एव भवति ।

२०. उत्कण्ठितस्य हृदयानुगुणा वयस्या सङ्केतके चिरयति प्रवरो विनोदः ।

संस्थापना प्रियतमा विरहातुराणां रक्तस्य रागपरिवृद्धिकरः प्रमोदः ॥३/३

अन्वयः – उत्कण्ठितस्य हृदयानुगुणा वयस्या, सङ्केतके चिरयति प्रवरः विनोदः, विरहातुराणां प्रियतमा संस्थापना रक्तस्य रागपरिवृद्धिकरः प्रमोदः (अस्ति) ।

पदार्थः – वीणा, उत्कण्ठितस्य - विरहवेदविह्वलस्य, जनस्य, हृदयानुगुणा - हृदयानुरूपा, वयस्या - प्रियसखी, सङ्केतयति - दत्तसङ्केते, चिरयति - विलम्बं कुर्वाणे, प्रवरः - प्रकृष्टः, विनोदः - मनोरञ्जनसाधनः,

विरहातुराणां - विरहेण वियोगेन आतुराणां व्याकुलानाम्, प्रियतमा - चित्तानुरूपा, संस्थापना - धैर्यदायिनी, रक्तस्य - अनुरक्तस्य, जनस्य, रागवृद्धिकरः - रागस्य अनुरागस्य, परिवृद्धिकरः - संवर्धकः, प्रमोदः - विनोदः, अस्तीति शेषः । उल्लेखालङ्कारः । वसन्ततिलकाच्छन्दः ।

भावार्थः – सङ्गीतं श्रुत्वा प्रत्यावर्त्तनसमये रेभिलस्य गायकस्य प्रशंसामुखेन वीणां प्रशंसति चारुदत्तः – वीणा हि नाम विरहाकुलस्य चित्तस्य अनुरूपा प्रियसखी, नायकनायिकाभ्यामेकान्तमिलननिर्दिष्टस्थाने तयोः प्रतीक्षासमयस्य श्रेष्ठमनोविनोदसाधनम् । विरहातुरजनानां धैर्यदायिनी प्रियतमा । अनुरागयुक्तस्य प्रेम्णः प्रीतिवर्द्धकसाधनम् ।

२१. **रक्तं च नाम मधुरं च समं स्फुटं च भावान्वितं च ललितं च मनोहरं च ।**

**किं वा प्रशस्तवचनैर्बहुभिर्मदुक्तैरन्तर्हिता यदि भवेद्वनितेति मन्ये ॥३/४**

अन्वयः – (गीतम्) नाम रक्तं च मधुरं च समम् स्फुटं च भावान्वितं च ललितं च मनोहरं च (आसीत्) वा मदुक्तैः बहुभिः प्रशस्तवचनैः किम् यदि वनिता अन्तर्हिता भवेत् इति मन्ये ।

पदार्थः – गीतम् इति योजनीयम्, नाम - निश्चयमेव, रक्तं - विभिन्नरागसंवलितम्, मधुरं - श्रवणसुभगम्, समं - स्वराणां सामञ्जस्ययुक्तम्, स्फुटं - सुस्पष्टम्, भावान्वितं च - भावैः सदभिप्रायैः अन्वितं समन्वितम् ललितं - लालित्याख्यधर्मविशेषयुक्तम्, मनोहरं च - चित्ताकर्षकञ्च, आसीदिति शेषः । वा - अथवा, मदुक्तैः - मया कथितैः, बहुभिः - अनेकैः, प्रशस्तवचनैः - प्रशंसावाक्यैः, किं - किं प्रयोजनम्, अस्तीति योजनीयम् यदि - कदाचित्, वनिता - ललना, अन्तर्हिता - रेभिलरूपेणाच्छन्ना, भवेत् - स्यात्, इति - एतत्, मन्ये - अहं तर्कयामि । उत्प्रेक्षालङ्कारः । वसन्ततिलकाछन्दः ।

भावार्थः – विदूषकस्य विरक्तिमयं वचनं श्रुत्वा गायकस्य गीतेनात्यधिकः सन्तुष्टश्चारुदत्तः पुनः तस्य गीतप्रशंसा करोति - रेभिलेन गीतं संगीतं अनुरागपरिपूर्णं श्रुतिसुखकरं स्वरतालसामञ्जस्यसमन्वितं, स्पष्टं विविधभावयुक्तं सुन्दरं चेतःप्रसादकरम् अस्ति । किं बहुना ? यदि रेभिलमहोदयः यवनिकान्तराले इदं संगीतं गायेत्, तर्हि सः एका रमणी इति मम मनसि भ्रमः जायेत ।

२२. **कः श्रद्धास्यति भूतार्थं सर्वो मां तुलयिष्यति ।**

**शङ्कनीया हि लोकेऽस्मिन्निष्प्रतापा दरिद्रता ॥३/२४**

अन्वयः – कः भूतार्थं श्रद्धास्यति, सर्वः मां तुलयिष्यति, हि अस्मिन् लोके निष्प्रतापा दरिद्रता शङ्कनीया भवति ।

पदार्थः – कः - कः जनः, भूतार्थं - यथार्थम्, श्रद्धास्यति - विश्वासं करिष्यति, सर्वः - निखिलः, जनः, मां - चारुदत्तम्, तुलयिष्यति - अवज्ञास्यति । हि - यतः, अस्मिन् - एतस्मिन्, लोके - संसारे, निष्प्रतापा - निस्तेजा, दरिद्रता - निर्धनता, शङ्कनीया - शङ्कायोग्या, भवतीति शेषः । अर्थान्तरन्यासः अलङ्कारः । अनुष्टुप्च्छन्दः ।

भावार्थः – न्यासरूपं धृतं सुवर्णभाण्डं चौरणापहृतमित्याकर्ण्य मूर्च्छितः क्षणान्तरं समाश्वस्य चारुदत्तः कथयति यत् - कः जनः प्रकृतार्थं विश्वसिष्यति ? निखिललोकः मां सन्देहं करिष्यति । यतो हि अस्मिन् लोके प्रतापहीना निर्धनता सर्वदा सन्देहयोग्या भवति ।

२३. **विभवानुगता भार्या सुखदुःखसुहृद्भवान् ।**

**सत्यं च न परिभ्रष्टं यद्दरिद्रेषु दुर्लभः ॥३/२८**

अन्वयः – (यस्य) भार्या विभवानुगता, भवान् सुखदुःखसुहृत्, सत्यं च न परिभ्रष्टं यत् दरिद्रेषु दुर्लभम् ।

पदार्थः – मम - चारुदत्तस्य, भार्या - पत्नी, विभवानुगता - विभवस्य अनुगता अनुसारिणी, भवान् - त्वम् विदूषकः, सुखदुःखसुहृत् - सुखदुःखयोः सम्पत्तिविपत्त्योः सुहृत् - मित्रम्, अस्तीति योजनीयम्, सत्यं च - सत्यकथनम् च, न - नहि, परिभ्रष्टं - नष्टम्, यत् दरिद्रेषु - निर्धनेषु, दुर्लभं - दुष्प्राप्यम् । अस्तीति योजनीयम् ॥

भावार्थः – स्वां दरिद्रतां समर्थयन् चारुदत्तः कथयति - मम पत्नी धनसमार्थ्यानुसारेण सांसारिककर्म निर्वाहकारिणी अस्ति । सुखदुःखेषु सहभागी त्वत्सदृशः बन्धुरपि अस्ति । अद्यापि अहं सत्यभाषणात् च्युतः न भवामि । एतत् सर्वं दरिद्रेषु दुर्लभः अस्ति । अतः अहं दरिद्रः सन्नपि धनिकः अस्मि ।

## चतुर्थोऽङ्कः

२४. स्त्रीषु न रागः कार्यो रक्तं पुरुषं स्त्रियः परिभवन्ति ।

रक्तैव हि रन्तव्या विरक्तभावा तु हातव्या ॥४/१३

अन्वयः – स्त्रीषु रागः न कार्यः, स्त्रियः रक्तं पुरुषं परिभवन्ति । हि रक्ता एव रन्तव्या विरक्तभावा तु हातव्या ।

पदार्थः – स्त्रीषु - नारीषु, रागः - अनुरागः, न - नहि, कार्यः - कर्त्तव्यः, स्त्रियः - नार्यः, रक्तं - अनुरक्तम्, पुरषं - जनम्, परिभवन्ति - तिरस्कुर्वन्ति । हि - निश्चितमेव, रक्ता - अनुरक्ता नारी, एव, रन्तव्या - रमणार्हा, विरक्तभावा - विरक्तः अनुरागरहितः भावः यस्याः सा, तु, हातव्या - परित्यजनीया । काव्यलिङ्गमलङ्कारः । आर्याच्छन्दः ।

भावार्थः – स्त्रीणां विश्वासो नैव कर्त्तव्यः इति पुनरपि शर्विलकः निर्दिशति – रमणीषु प्रीतिः न करणीया । रमण्यः अनुरक्तं पुरुषम् अपमानयन्ति । अतः अनुरक्ताः रमण्यः हि रमणार्हा भवन्ति । अनुरागरहहिताः रमण्यः परिवर्जनीयाः भवन्ति ।

२५. न पर्वताग्रे नलिनी प्ररोहति न गर्दभा वाजिधुरं वहन्ति ।

यवाः प्रकीर्णा न भवन्ति शालयो न वेशजाता शुचयस्तथाङ्गना ॥४/१७

अन्वयः – पर्वताग्रे नलिनी न प्ररोहति, गर्दभाः वाजिधुरं न वहन्ति, प्रकीर्णाः यवाः शालयः न भवन्ति तथा वेशजाताः अङ्गनाः शुचयः न (भवन्ति) ।

पदार्थः – पर्वताग्रे - पर्वतस्य गिरेः अग्र शिखरे, नलिनी - कमलिनी, न- नहि, प्ररोहति - जायते, गर्दभाः - रासभाः, वजिधुरं - वाजिनाम्, अश्वानां धुरं भारम्, न - नहि, वहन्ति - वहनं कुर्वन्ति, प्रकीर्णाः - क्षेत्रे, उप्ताः, यवाः - यवनामकसस्यविशेषाः, शालयः - शालिनामकसस्यविशेषाः, न - नहि, भवन्ति - उत्पद्यन्ते, तथा - तेनैव प्रकारेण, वेशजाताः - वेशे वेश्यागृहे जाताः उत्पन्नाः, अङ्गनाः - ललनाः, शुचयः - शुद्धाः, न - नहि, भवन्तीति योजनीयम् । दृष्टान्तालङ्कारः । वंशस्थं छन्दः ।

भावार्थः – वेश्यानां चापल्यंविषये कस्यापि सूक्तिं प्रमाणयति शर्विलकः – वेश्यानां चापल्यविषये कस्यापि सूक्तिं प्रमाणयति शर्विलकः - यथा शैलशीखरे पद्मिनी न उत्पद्यते, रासभाः अश्वानां भारं न धारयन्ति । क्षेत्रेषु उप्ताः जवाः धान्यानि न जायन्ते । तथैव वेश्यालये उत्पन्नाः स्त्रियः (वेश्याः)हृदयतः पवित्राः सुस्पष्टव्यवहाराश्च न भवन्ति ।

२६. गुणेषु यत्नः पुरुषेण कार्यो न किञ्चिदप्राप्यतमं गुणानाम् ।

गुणप्रकर्षादुडुपेन शम्भोरलङ्घ्यमुल्लङ्घितमुत्तमाङ्गम् ॥४/२३

अन्वयः – पुरुषेण गुणेषु यत्नः कार्यः, गुणानां किञ्चित् अपि अप्राप्यतमं न, उडुपेन गुणप्रकर्षात् अलङ्घ्यं शम्भोः उत्तमाङ्गं लङ्घितम् ।

पदार्थः – पुरुषेण - जनेन, गुणेषु - दयादिषु गुणेषु, यत्नः - प्रयत्नः, कार्यः - करणीयः, गुणानां - दयादीनाम्, किञ्चित् अपि - किमपि, अप्राप्यतमं - दुर्लभम्, न - नहि, अस्तीति शेषः, उडुपेन - चन्द्रेण, गुणप्रकर्षात् - गुणाधिक्यात्, अलङ्घ्यं - लङ्घितुमशक्यम्, शम्भोः - शङ्करस्य, उत्तमाङ्गं - शिरः, लङ्घितम् - अधिगतम् । अर्थान्तरन्यासअलङ्कारः । उपेन्द्रवज्राच्छन्दः ।

भावार्थः – पुरुषैः सदा गुणानामेव सङ्ग्रहे यत्नः कर्त्तव्यः इति शर्विलकः कथयति – पुरुषैः दयाद्यक्षिण्यादिगुणेषु प्रयत्नः करणीयः । दयादाक्षिण्यादिगुणानां किमपि वस्तु दुष्प्राप्यं नास्ति । चन्द्रमसा गुणाधिक्यात् केनापि अलङ्घनीयं शङ्करस्य शीर्षं आरुढम् ।

२७. गुणप्रवालं विनयप्रशाखं विश्रम्भमूलं महनीयपुष्पम् ।

तं साधुवृक्षं स्वगुणैः फलाढ्यं सुहृद्विहङ्गाः सुखमाश्रयन्ति ॥४/३२

अन्वयः – गुणप्रवालं विनयप्रशाखं विश्रम्भमूलं महनीयपुष्पं स्वगुणैः फलाढयं तं साधुवृक्षं सुहृद्विहङ्गाः सुखम् आश्रयन्ति ।

पदार्थः – गुणप्रवालं - गुणाः दयादाक्षिण्यादिगुणाः एव प्रवालाः पल्लवाः यस्य तम्, विनयप्रशाखं - विनयः विनम्रता एव प्रशाखा उत्कृष्टा शाखा यस्य तम्, विश्रम्भमूलं - विश्रम्भः विश्वासः एव मूलं यस्य तम्, महनीयपुष्पं - महनीयं पूजनीयं पुष्पं कुसुमं यस्य तम्, स्वगुणैः - स्वदयादिगुणैः, फलाढयं - फलसम्पन्नम्, तं - पूर्वोक्तं चारुदत्तरूपम्, साधुवृक्षं - सज्जनपादपम्, सुहृद्विहङ्गाः - सुहृदः मित्राणि एव विहङ्गाः पक्षिणः, सुखं - सानन्दम्, आश्रयन्ति - अवलम्बन्ते । रूपकालङ्कारः ।

भावार्थः – कुशलप्रश्नानन्तरं वसन्तसेना आर्यचारुदत्तविषयकं किमपि पृच्छति – दयादाक्षिण्यादिगुणाः एव नवपल्लवाः यस्य तं, विनम्रता एव प्रकृष्टशाखाः यस्य तं, विश्वासः एव मूलं यस्य तं, महनीयता एव पुष्पं यस्य तं, स्वस्य सद्गुणाः एव फलानि यस्य तं, चारुदत्तरूपं सज्जनवृक्षम् सुखेन मित्ररूपीविहगाः आश्रयन्ति । अत्र चारुदत्तं एकेन सद्वृक्षेण सह तुलीयते ।

## पञ्चमोऽङ्कः

२८. निष्पन्दीकृतपद्मषण्डनयनं नष्टक्षपावासरं

विद्युद्भिः क्षणनष्टदृष्टतिमिरं प्रच्छादिताशामुखम् ।

निश्चेष्टं स्वपितीव सम्प्रति पयोधारागृहान्तर्गत

स्फीताम्भोधरधामनैकजलदच्छत्रापिधानं जगत् ॥५/२४

अन्वयः – निष्पन्दीकृतपद्मषण्डनयनं नष्टक्षपावासरं विद्युद्भिः क्षणनष्टः दृष्टतिमिरं प्रच्छादिताशामुखं स्फीताम्भोधरधामनैकजलदच्छत्रापिधानं पयोधारागृहान्तर्गतं जगत् सम्प्रति निश्चेष्टं स्वपिति इव ।

पदार्थः – निष्पदीकृतपद्मषण्डनयनं - निष्पन्दीकृतानि निश्चलीकृतानि पद्मषण्डानि कमलसमूहाः एव नयनानि नेत्राणि येन तत्, नष्टक्षपावासरं - नष्टौ अदर्शनं गतौ क्षपावासरं निशादिवसौ यस्मिन् तत्, विद्युद्भिः -

चञ्चलाभिः, क्षणनष्टदृष्टतिमिरं - क्षणं किञ्चित्कालं नष्टं अदर्शनगतं पश्चात् दृष्टम् अवलोकितम् तिमिरम् अन्धकारः यत्र तथाभूतम्, प्रच्छादिताशामुखं - प्रच्छादितानि आच्छादितानि आशा दिशः एव मुखानि आननानि यस्य तत्, स्फीताम्भोधरधामनैकजलदच्छत्रापिधानं स्फीतानां वृद्धिङ्गतानाम् अम्भोधराणां मेघानां धामनि स्थाने आकाशे ये नैकजलदाः भूरिमेघाः एव क्षत्राणि आतपत्राणि तैः अपिधानम् आच्छन्नं यस्य तत्, पयोधारागृहान्तर्गतं - पयोधाराः जलप्रवाहाः एव गृहाणि गेहानि तेषाम् अन्तर्गतं मध्यस्थितम्, जगत् - भुवनम्, सम्प्रति - अधुना, निश्चेष्टं - निश्चलम्, स्वपिति इव - शयनं करोति इव । उत्प्रेक्षालङ्कारः । शार्दूलविक्रीडितं छन्दः ।

भावार्थः — विटोऽपि प्रकारान्तरेण वर्षासमयं वर्णयन् कथयति — अस्मिन् वर्षाकाले निखिलं जगत् शयनं कृतमिव प्रतीयते । अस्य जगत् नेत्रस्वरूपाणि पद्मसमूहानि अविकसितानि सन्तः निमीलितानि जातानि, दिवसरजन्यः दर्शनहीनतां प्राप्ताः सन्तः एकरूपाः भवन्ति । तडिद्भिः समग्रसंसारं क्षणं आलोकितं भवति, अपरक्षणं अन्धकारमयं भवति । अस्य जगतः दिशारूपाननानि समाच्छादितानि भवन्ति । आकाशः अनेकमेघरूपीछत्रैः आच्छादितः भवति । जलाधारारूपगृहाभ्यन्तरे समग्रं जगत् निष्क्रियं सत् शेते इव प्रतीयते ।

२९. गता नाशं तारा उपकृतमसाधाविव जने

वियुक्ता कान्तेन स्त्रिय इव न राजन्ति ककुभः ।

प्रकामान्तस्तप्तं त्रिदशपतिशस्त्रस्य शिखिना

द्रवीभूतं मन्ये पतति जलरूपेण गगनम् ॥५/२५

अन्वयः — असाधौ जने उपकृतम् इव ताराः नाशं गताः कान्तेन वियुक्ताः स्त्रियः इव ककुभः न राजन्ति, त्रिदशपतिशस्त्रस्य शिखिना प्रकामम् अन्तस्तप्तं द्रवीभूतं गगनं जलरूपेण पतति (इति) मन्ये ।

पदार्थः — असाधौ - असज्जने, जने - पुरुषे, उपकृतं - विहितोपकारः, इव, ताराः - नक्षत्राणि, नाशम् - अदर्शनम्, गताः - प्राप्ताः, कान्तेन - प्रियेण, वियुक्ताः - विरहिताः, स्त्रियः - नार्यः, इव, ककुभः - दिशः, न राजन्ति - न शोभन्ते, त्रिदशपतिशस्त्रस्य - त्रिदशाः देवाः तेषां पतिः राजा इन्द्रः तस्य शस्त्रस्य आयुधस्य, वज्रस्य इत्यर्थः, शिखिना - अग्निना, प्रकामम् - अत्यधिकम्, अन्तस्तप्तम् - अभ्यन्तरसन्तप्तम्, द्रवीभूतं - द्रवतां प्राप्तम्, गगनम् - आकाशम्, जलरूपेण - वारिरूपेण, पतति - स्रवति, (इति) मन्ये - अहं वसन्तसेना सम्भावयामि । उपमोत्प्रेक्षा चालङ्कारौ । शिखरिणीच्छन्दः ।

भावार्थः — वसन्तसेना जलदिनविषयकविटोक्तिं समर्थयमाना पुनर्वर्णयति — अस्मिन् वर्षाकाले आकाशे तारागणः दुर्जनजने कृतः उपकारः इव विलुप्तः भवति, दिशः पतिविरहिण्यः रमण्यः इव न शोभन्ते । देवराजइन्द्रस्य वज्रस्य वह्निना अत्यन्तं अभ्यन्तरसन्तप्तः सन् आकाशः द्रवरूपेण जलरूपेण वा अधः निपततीति मन्ये ।

३०. विद्युद्भिर्ज्वलतीव संविहसतीवोच्चैर्बलकाशतै-

र्माहेन्द्रेण विवल्गतीव धनुषा धाराशरोद्गारिणा ।

विस्पष्टाशनिनिस्वनेन रसतीवाघूर्णतीवानिलै-

र्नीलैः सान्द्रमिवाहिभिर्जलधरैर्धूपायतीवाम्बरम् ॥५/२७

अन्वयः — अम्बरं विद्युद्भिः ज्वलति इव, बलाकाशतैः उच्चैः संविहसति इव, धाराशरोद्गारिणा माहेन्द्रेण धनुषा विवल्गति इव, विस्पष्टाशनिनिस्वनेन रसति इव, अनिलैः आघूर्णति इव, अहिभिः इव, नीलैः जलधरैः सान्द्रं धूपायति इव ।

पदार्थः — अम्बरम् - अकाशम्, विद्युद्भिः - तडिद्भिः, ज्वलति इव - उद्भासते इव, बलाकाशतैः - बकशतैः, उच्चैः - तारम्, संविहसति इव - सम्यग्रूपेण हासं करोति इव, धाराशरोद्गारिणा - धाराः जलधारा एव शराः बाणाः तान् उद्गारिणा वर्षिणा, माहेन्द्रेण - इन्द्रसम्बन्धिना, धनुषा - कोदण्डेन, विवल्गति इव - प्लुतगतिं करोति इव, विस्पष्टाशनिनिस्वनेन - विस्पष्टः सुव्यक्तः यः अशनेः वज्रस्य स्वनः ध्वनिः तेन, अनिलैः - पवनैः, आधूर्णति - भ्रमति, इव, अहिभिः इव - सर्पैरिव, नीलैः नीलवर्णैः, जलधरैः इव - वादलैः इव, सान्द्रम् - अत्यधिकम्, धूपायति इव - धूपितं भवति इव । रूपक उपमाचालङ्कारौ । शार्दूलविक्रीडितं छन्दः ।

भावार्थः — विटः पुनः वर्षाकालस्य दिनस्य वर्णनं करोति — अस्मिन् वर्षाकाले तडिद्भिः आकाशः प्रज्वलति इव, वलाकासमूहैः अत्यन्त हास्यं करोतीव, जलधारारूपवाणैः वर्षतीव, इन्द्रधनुषा योद्धुं प्रवर्त्तते इव, वज्रध्वनिना गर्जति इव, पवनैः भ्रमति इव, सर्पसदृशैः कृष्णवर्णैः मेघैः सघनं धूपायति इव प्रतीयते ।

३१. **धनैर्वियुक्तस्य नरस्य लोके किं जीवितेनादित एव तावत् ।**

**यस्य प्रतीकारनिरर्थकत्वात्कोपप्रसादा विफलीभवन्ति ॥५/४०**

अन्वयः — लोके धनैः वियुक्तस्य नरस्य आदितः एव जीवितेन किं तावत् प्रतीकारनिरर्थकत्वात् यस्य कोपप्रसादाः विफलीभवन्ति ।

पदार्थः — लोके - जगति, धनैः - सम्पद्भिः, वियुक्तस्य - रहितस्य, नरस्य - जनस्य, आदितः एव - जन्मतः एव, जीवितेन - जीवनेन, तावत् - किं प्रयोजनम्, यस्य - निर्धनस्य मनुष्यस्य, प्रतीकारनिरर्थकत्वात् - प्रतीकारासफलीभूतत्वात्, कोपप्रसादाः - क्रोधानुग्रहाः, विफलीभवन्ति - निष्फला भवन्ति । काव्यलिङ्गमलङ्कारः । उपजातिः छन्दः ।

भावार्थः — दरिद्रः कोपे प्रतिकर्तुं अनुग्रहे च उपकर्तुं सर्वथा असमर्थः भवति, अतः तस्य कोपप्रसादाः निष्फला एव जायन्ते इति चारुदत्तः जनान्तिकं विदूषकं कथयति — संसारेऽस्मिन् धनहीनस्य नरस्य जन्मतः एव प्राणधारणेन कोऽपि लाभः नास्ति । यतो हि दरिद्रस्य क्रोधाः अनुग्रहाश्च प्रतिशोधे प्रतिदाने च निरर्थकत्वात् निष्फलीभवन्ति । दरिद्रो नरः प्रसन्नो भूत्वाऽपि किमपि प्रदातुं न समर्थः, रुष्टो भूत्वापि किमपि अनिष्टं कर्तुं समर्थः न भवति ।

३२. **शून्यैर्गृहैः खलु समा पुरुषा दरिद्राः**

**कूपैश्च तोयरहितैस्तरुभिश्च शीर्णैः ।**

**यद्दृष्टपूर्वजनसङ्गमविस्मृताना**

**मेवं भवन्ति विफलाः परितोषकालाः ॥५/४२**

अन्वयः — दरिद्राः पुरुषाः खलु शून्यैः गृहैः तोयरहितैः कूपैः च शीर्णैः तरुभिः च समा (भवन्ति) यत् दृष्टपूर्वजनसङ्गमविस्मृतानां परितोषकालाः एव विफलाः भवन्ति ।

पदार्थः — दरिद्राः - निर्धनाः, पुरुषाः - जनाः, खलु - निश्चयेन, शून्यैः - जनविहीनैः, गृहैः - भवनैः, तोयरहितैः - जलविहीनैः, कूपैः च - उदपानैः च, शीर्णैः - शुष्कैः, तरुभिः - वृक्षैः, समा - समाना, भवन्तीति योजनीयम् । यत् - यस्मात्, दृष्टपूर्वजनसङ्गमविस्मृतानां - दृष्टपूर्वस्य पूर्वपरिचितस्य जनस्य व्यक्तेः सङ्गमेन मिलनेन विस्मृतानां विस्मृतनिजदैन्यानां तेषां निर्धनानाम्, परितोषकालाः - सन्तोषसमयाः, एवम् - अनेन प्रकारेण, विफलाः - निष्फलाः, भवन्ति - जायन्ते । मालोपमालङ्कारः । वसन्ततिलकाच्छन्दः ।

भावार्थः — दरिद्रस्य पुरुषस्य स्थितिं वर्णयन् चारुदत्तः कथयति — दरिद्रजनाः जनशून्यगृहैः सह जलरहितकूपैः सह पत्रपुष्पफलादिहीनवृक्षैः सह समानाः भवन्ति । एते दरिद्रजनाः पूर्वपरिचितस्य पुरुषस्य

मिलनेन विस्मृतदैन्यभावाः सन्तः पुरस्कारप्रदानावसरागते सति किमपि दातुं समर्थाः न भवन्ति ते मद्सदृशः विफलाः भवन्ति ।

३३. **धाराभिरार्यजनचित्तसुनिर्मलाभिश्चण्डाभिरर्जुनशरप्रतिकर्कशाभिः ।**

**मेघाः स्रवन्ति बलदेवपटप्रकाशाः शक्रस्य मौक्तिकनिधानमिवोद्गिरन्तः ॥५/४५**

**अन्वयः** — बलदेवपटप्रकाशाः मेघाः आर्यजनचित्तसुनिर्मलाभिः अर्जुनशरप्रतिकर्कशाभिः चण्डाभिः धाराभिः शक्रस्य मौक्तिकनिधानम् उद्गिरन्तः इव स्रवन्ति ।

**पदार्थः** — बलदेवपटप्रकाशः - बलदेवस्य बलरामस्य पटवत् प्रकाशः कान्ति येषां ते, मेघाः - बादलाः, आर्यजनचित्तसुनिर्मलाभिः - आर्यजनस्य सज्जनस्य चित्तवत् मनः इव सुनिर्मलाः स्वच्छाः ताभिः, अर्जुनशरप्रतिकर्कशाभिः - अर्जुनस्य पार्थस्य शरेण वाणेन प्रतिकर्कशाः सदृशकठिनाः ताभिः, अत एव चण्डाभिः - तीक्ष्णाभिः, धाराभिः - जलप्रवाहैः, शक्रस्य - इन्द्रस्य, मौक्तिकनिधानं - मुक्तनिधिम्, उद्गिरन्तः इव - उद्वमन्तः इव, स्रवन्ति - क्षरन्ति । मालोपमोत्प्रेक्षा चालङ्कारौ । वसन्ततिलकाच्छन्दः ।

**भावार्थः** — वर्षाकालस्य वर्णनं कुर्वन् चारुदत्तः पुनराह - बलरामस्य नीलवस्त्रप्रभा इव मेघाः सज्जनानां अन्तःकरणमिव विमलाभिः, अर्जुनस्य वाणा इव अतिकठोराभिः उग्राभिः जलधाराभिः इन्द्रस्य मुक्तासमूहम् निःसारयन्तः इव वर्षन्ति ।

## षष्ठोऽङ्कः

३४. **भाग्यानि मे यदि तदा मम कोऽपराधो**

**यद्वन्यनाग इव संयमितोऽस्मि तेन ।**

**दैवी च सिद्धिरपि लङ्घयितुं न शक्या**

**गम्यो नृपो बलवता सह को विरोधः ॥६/२**

**अन्वयः** — यदि मे भाग्यानि तदा मम कः अपराधः यत् तेन वन्यनागः इव संयमितः अस्मि । दैवीसिद्धिः अपि च लङ्घयितुं न शक्या (तथापि) नृपः गम्यः बलवता सह कः विरोधः ।

**पदार्थः** — यदि - चेत्, मे - मम आर्यकस्य, भाग्यानि - राज्योपभोगप्रदानानि सौभाग्यानि, अस्तीति शेषः, तदा - तर्हि, मम - आर्यकस्य, कः - कीदृशः, अपराधः - दोषः ! यत् - यस्मात् कारणात्, तेन - राज्ञा पालकेन, वन्यनागः इव- जङ्गलहस्ती इव, संयमितः - बद्धः, अस्मि - वर्ते । दैवी - दैवाधीना, सिद्धिः अपि च - राज्यप्राप्तिः अपि च, लङ्घयितुम् - अतिक्रमणं कर्तुम्, न शक्या - न समर्था, (तथापि) नृपः - भूपतिः पालकः, गम्यः - गमनीयः आश्रयणीयः इत्यर्थः, अस्तीति योजनीयम् । बलवता - शक्तिसम्पनेन पुरुषेण, सह - सार्धम्, कः - कीदृशः, विरोधः - शत्रुता, अस्तीति शेषः । उपमार्थान्तरन्यासश्चालङ्कारौ । वसन्ततिलकाच्छन्दः ।

**भवार्थः** — शोकाकुलितः अश्रूणि विमुच्य स्वभाग्यं प्रति आर्यकः कथयति — यदिः मम भाग्ये राज्यप्राप्तिः अस्ति, तर्हि तत्र मम को दोषः ? परन्तु तेन भूपतिना अहं अरण्यगज इव शृङ्खलेन निगडितोऽस्मि । दैवप्रतिपादिता राज्यलाभरूपसिद्धिः न कोऽपि अतिक्रामयितुं समर्थः भवति । राजा सर्वैः सेव्योऽस्ति । यतो हि बलशालिना सह विवादः न करणीयः । बलवता सह निर्बलस्य विरोधो नैव योग्यः । समानधर्मिणा सहैव मित्रता शत्रुता च करणीयाः ।

३५. भवेद् गोष्ठीयानं न च विषमशीलैरधिगतं

वधूसंयानं वा तदभिगमनोपस्थितमिदम् ।

बहिर्नेतव्यं वा प्रवरजनयोग्यं विधिवशाद्

विविक्तत्वाच्छून्यं मम खलु भवेद्दैवविहितम् ॥६/४

अन्वयः – इदं विषमशीलैः अधिगतं गोष्ठीयानं न च भवेत् वा वधूसंयानं (यत्) तदभिगमनोपस्थितम् वा मम विधिवशात् शून्यं वहिः नेतव्यं प्रवरजनयोग्यं, विविक्तत्वात् खलु (मम) दैवविहितं भवेत् ।

पदार्थः – इदं - पुरोदृश्यमानं प्रवहणम्, विषमशीलैः - भ्रष्टचरित्रैः, अधिगतम् - अधियातम्, गोष्ठीयानं - विद्वत्परिषदि गमनार्थ प्रवहणम्, न च भवेत् - न च स्यात्, वा - अथवा, वधुसंयानं - वध्वाः नवविवाहितायाः स्त्रियः संयानं प्रवहणम्, न भवेदिति योजनीयम्, यत् तदभिगमनोपस्थितं - तस्याः बध्वाः अभिगमनाय अभिगन्तुम् उपस्थितम् आगतम्, अस्तीति शेषः । वा - अथवा, ममेति शेषः, विधिवशात् - सौभाग्यात्, शून्यं - रिक्तम्, वहिः - बाह्यस्थाने, नेतव्यं - नेतुं योग्यः, प्रवरजनयोग्यं - प्रवरजनानां श्रेष्ठमनुष्याणां योग्यम् अधिरोहणोचितम्, न भवेदिति शेषः, विविक्तत्वात् - परिजनादिरहितत्वात्, खलु - निश्चितमेव, मम - आर्यकस्य, दैवेन - भाग्येन, विहितम् - आगतम्, भवेत् - स्यात् । सन्देहः अलङ्कारः । शिखरिणीच्छन्दः ।

भवार्थः – नेपथ्ये वर्द्धमानको रथमादाय वृषौ चालयन् रथं वाहयति तस्य ध्वनिं श्रुत्वा आर्यकः रथोऽपीतः एवागच्छतीति विचारयन् कथयति – इदं पुरोवर्त्तमानं यानं भ्रष्टस्वभावयुक्तदुर्जनाधिष्ठितं कमपि उत्सवं गन्तुं न तिष्ठेत् । नववध्वाः इतोऽन्यत्र गमनार्थं यानमिदं समुद्यतं स्यात् । अथवा भाग्यवशात् परिजनादिशून्यं इदं यानं मम कृते दैवेन प्रेरितं स्यात् ।

३६. त्यजति किल तं जयश्रीर्जहति च मित्राणि बन्धुवर्गश्च ।

भवति च सदोपहास्यो यः खलु शरणागतं त्यजति ॥६/१८

अन्वयः – यः शरणागतं त्यजति तं जयश्रीः खलु त्यजति । मित्राणि बन्धुवर्गः च किल जहति (सः) सदा उपहास्यः च भवति ।

पदार्थः – यः - यः जनः, शरणागतम् - आश्रयमायातम्, त्यजति - जहति, तं - मनुष्यम्, जयश्रीः - विजयलक्ष्मीः, खलु - निश्चयेन, त्यजति - जहाति, मित्राणि - सुहृदः, बन्धुवर्ग - सम्बन्धिगणः, च, किंल - निश्चितमेव, जहति - त्यजति । सः - जनः, सदा - सदैव, उपहास्यः - उपहसनीयः, च, भवति - जायते । आर्याच्छन्दः ।

भवार्थः – 'शरणागतोऽस्मीति' वदति आर्यके चन्दनकोऽपि अभयं शरणागतस्येति वदति, युक्तञ्चेदं शरणागतत्राणमिति युक्त्या आर्यकः समर्थनपूर्वकं कथयति – यः जनः शरणागतं त्यजति । तं जनं विजयलक्ष्मीः मित्राणि, आत्मीयस्वजनाश्च सर्वे परित्यजन्ति । सः जनः सर्वैः सर्वत्र सर्वदा सर्वथा उपहसनीयः भवति ।

३७. भीताभयप्रदानं ददतः परोपकाररसिकस्य ।

यदि भवति भवतु नाशस्तथापि खलु लोके गुण एव ॥६/१९

अन्वयः – भीताभयप्रदानं ददतः परोपकाररसिकस्य यदि नाशः भवति भवतु, तथापि लोके गुणः एव (भवति) ।

**पदार्थः** – भीताभयप्रदानं - भीतेभ्यः भययुक्तेभ्यः अभयस्य अभीतेः प्रदानं दानम्, ददतः - यच्छतः, परोपकाररसिकस्य - परोपकारे परसाहाय्ये रसिकस्य अनुरागिणः, जनस्य, यदि - चेत्, नाशः - मृत्युः, भवति - जायते, तर्हि, भवतु - अस्तु, तथापि - मृत्युं गतेऽपि, लोके - जगति, गुणः - कीर्त्तिः, एव, भवतीति शेषः । आर्याच्छन्दः ।

**भावार्थः** – स्थिरतया शरणागतरक्षा मया कर्त्तव्या इति पुनः विचार्य कथयति चन्दनकः - शरणागतरक्षणे परेषां हितसाधने तत्परस्य कस्यापि यदि मृत्युर्भवति, तर्हि सोऽपि मृत्युः संसारे यशस्करः एवास्ति। अतः अत्र आर्यकरक्षणे यदि मम मृत्युः भवेत्, तर्हि सः मृत्युरपि श्रेयस्करं भवति ।

## सप्तमोऽङ्कः

३८ **विधिनैवोपनीतस्त्वं चक्षुर्विषयमागतः ।**

**अपि प्राणानहं जह्यां न तु त्वां शरणागतम् ॥७/६**

**अन्वयः** – त्वं विधिना एव उपनीतः चक्षुर्विषयं आगतः अहं प्राणान् अपि जह्यां तु शरणागतं त्वाम् न (जहामि) ।

**पदार्थः** – त्वम् - भवान्, विधिना - भाग्येन, एव, उपनीतः - अत्र प्रापितः, मम, चक्षुषोः - नयनयोः, विषयम् - दृष्टिपथम्, आगतः - समागतः, अहम् - चारुदत्तः, प्राणान्- असून्, अपि, जह्याम् - त्यजेयम्, तु - किन्तु, शरणागतम् - शरणापन्नम्, त्वाम् - आर्यकं, न - नहि, जहामीति शेषः । पथ्यावक्त्रं वृत्तमत्र ।

**भावार्थः** – अत्र चारुदत्तः आर्यकाय अभयदानं कृत्वा कथयति – त्वं भाग्येन एव अत्रानीतः मम नेत्रयोः दृष्टिपथं समागतः । अतः अहं प्राणान् त्यजेयम् । परन्तु शरणागतं त्वां न परित्यजामि ।

## अष्टमोऽङ्कः

३९. **स्त्रीभिर्विमानितानां कापुरुषाणां विवर्धते मदनः ।**

**सत्पुरुषस्य स एव तु भवति मृदुर्नैव वा भवति ॥८/९**

**अन्वयः** – स्त्रीभिः विमानितानां कापुरुषाणां मदनः विवर्धते तु सत्पुरुष स्यस्य सः एव मृदुः भवति वा न एव भवति ।

**पदार्थः** – स्त्रीभिः - वनिताभिः, विमानितानां - तिरष्कृतानाम्, कापुरुषाणां - कामीजनानाम्, मदनः - कामः, विवर्धते - वृद्धिं गच्छति । तु - किन्तु, सत्पुरुषस्य - सज्जनस्य, सः - मदनः, एव, मृदुः - क्षीणः, भवति - जायते, वा - अथवा, न एव - नहि एव, भवति - उत्पद्यते । अप्रस्तुतप्रशंसालङ्कारः । आर्याच्छन्दः ।

**भावार्थः** – शिलातले समुपविष्टः शकारोऽतितमा तिरस्कृतोऽपि वसन्तसेनया पुनरपि तामेव स्मरतीति विलोक्य विटः स्वगतं कथयति - कामिनिभिः उपेक्षितानां धृष्टजनानां कामविकारः अनुक्षणं वृद्धिं गच्छति । परन्तु सज्जनस्य कामविकारः क्षीणः जायते अथवा नैव जायते ।

४०. **यत्नेन सेवितव्यः पुरुषः कुलशीलवान् दरिद्रोऽपि ।**

**शोभा हि पणस्त्रीणां सदृशजनसमाश्रयः कामः ॥८/३३**

**अन्वयः** – कुलशीलवान् पुरुष दरिद्रः अपि यत्नेन सेवितव्यः, हि सदृशजनसमाश्रयः कामः पणस्त्रीणां शोभा (अस्ति) ।

पदार्थः – कुलशीलवान् - सद्वंशस्वभावसम्पन्नः, पुरुषः - व्यक्तिः, दरिद्रः अपि - निर्धनः अपि, यत्नेन - प्रयत्नेन, सेवितव्यः - सेवनीयः, हि - यतः, सदृशजनसमाश्रयः - सदृशजनः अनुरूपजनः समाश्रयः अवलम्बनम्, कामः - मदनः, पणस्त्रीणां - पणेन मूल्येन स्त्रियः रमण्यः तासाम्, शोभा आभूषणम्, अस्तीति योजनीयम् । अर्थान्तरन्यासः अलङ्कारः । आर्याच्छन्दः ।

भावार्थः – शकारसदृशेन दुःशीलेन सह मम सम्बन्धं सर्वथापि निन्दनीयैवेति शकारं वसन्तसेना कथयति – निर्धनः अपि सद्वंशोत्पन्नः चरित्रवान् मनुष्यः प्रयत्नेन सेवनीयः । यतो हि स्वानुरूपजनेन सह समागमेन वेश्याजनानां शोभा द्विगुणिता भवति ।

४१. हस्तसंयतो मुखसंयत इन्द्रियसंयतः स खलु मानुषः ।

किं करोति राजकुलं तस्य परलोको हस्ते निश्चलः ॥८/४७

अन्वयः – सः खलु मनुष्यः हस्तसंयतः मुखसंयतः इन्द्रियसंयतः (अस्ति) । राजकुलं तस्य किं करोति परलोकः (तस्य) हस्ते निश्चलः ।

पदार्थः – सः खलु - सः एव, मनुष्यः - मनुष्यत्वेन मान्यः, (यः), हस्तसंयतः - हस्तेन करेण संयतः संयमयुक्तः, इन्द्रियसंयतः - इन्द्रियैः करणैः संयतः संयमितः, अस्तीति योजनीयम् । राजकुलं - शासकसमूहः विचारालयः, तस्य - एतादृशस्य, जनस्य, किं करोति - किं विदधाति । परलोकः - स्वर्गादिः, (तस्य) हस्ते - करे, निश्चलः- ध्रुवः । परिसङ्ख्यालंकारः । उपजातिश्छन्दः ।

भावार्थः – तरुणीमपि वसन्तसेनामादाय गच्छतः भिक्षुकस्य व्यवहारशुद्धिमुपदिशति – यः जनः हस्तेन अनेकदोषादिशून्यः अर्थात् निष्पापः, मुखेन नियमितः अर्थात् वाक्संयमी, ज्ञानेन्द्रियैः कर्मेन्द्रियैः च नियमितः अर्थात् जितेन्द्रियः अस्ति । सः जनः एव मानविकतागुणसंपन्नः मनुष्यः मनुष्यत्वेन मान्यः अस्ति । तस्य जनस्य शासकसमूहः किमपि अनिष्टं कर्तुं समर्थः न भवति । तस्य जनस्य हस्ते स्वर्गः अचलः वर्त्तते ।

## नवमोऽङ्कः

४२. शास्त्रज्ञः कपटानुसारकुशलः वक्ता न च क्रोधन-

स्तुल्यो मित्रपरस्वकेषु चरितं दृष्ट्वैव दत्तोत्तरः ।

क्लीबान्पालयिता शठान्व्यथयिता धर्म्यो न लोभान्वितो

द्वार्भावे परतत्त्वबद्धहृदयो राज्ञश्च कोपापहः ॥९/५

अन्वयः – (अधिकरणिकः) शास्त्रज्ञः कपटानुसारकुशलः वक्ता न च क्रोधनः मित्रपरस्वकेषु तुल्यः चरितं दृष्ट्वा एव दत्तोत्तरः क्लीबान् पालयिता शठान् व्यथयिता धर्म्यः न लोभान्वितः, द्वाभवि परतत्त्वबद्धहृदयः च राज्ञः कोपापहः भवेत् ।

पदार्थः – अधिकरणिकः, शास्त्रज्ञः - शास्त्रवेत्ता, कपटानुसारकुशलः - कपटस्य कैतवस्य अनुसारे अनुसरणे कुशलः निपुणः, वक्ता - वाग्मी, न च क्रोधनः - क्रोधरहितः, मित्रपरस्वकेषु - मित्रेषु सुहृत्सु परेषु शत्रुषु स्वकेषु आत्मीयेषु च, तुल्यः - समन्यायः, चरितं - व्यवहारम्, दृष्ट्वा - विलोक्य, एव, दत्तोत्तरः - दत्तं श्रावितं उत्तरं निर्णयः येन सः, क्लीबान् - दुर्बलान्, पालयिता - रक्षकः, शठान् - दुर्जनान्, व्यथयिता - दण्डयिता, धर्म्यः - धार्मिकः, न लोभान्वितः - तृष्णारहितः, द्वार्भावे - उपाये सति, परतत्त्वबद्धहृदयः - परम् उत्कृष्टं यत् तत्त्वं याथार्थ्यं तस्मिन् बद्धहृदयः दत्तचित्तः न, च, राज्ञः - नृपस्य, कोपापहः - क्रोधापसारकः, भवेदिति योजनीयम् । शार्दूलविक्रीडितं छन्दः ।

भावार्थः – अधिकरणिकानां वैशिष्ट्यं प्रतिपादयत् अधिकरणिकः कथयति – न्यायाधीशः राजनीतिन्यायादि धर्ममर्मज्ञः, छलस्य अनुसरणे निपुणः, वाग्मी, क्रोधरहितः आत्मीयेषु शत्रुषु स्वजनेषु समदर्शी, आचरणं दृष्ट्वा दत्तोत्तरः, दुर्बलानां रक्षकः, धूर्तानां दण्डयिता, धर्माचारी, लोभशून्यः, उपायसत्त्वे वादिप्रभृतीनां याथार्थ्यतत्त्वे व्यासक्तमनाः, नृपस्य क्रोधापसारकश्च भवेत् ।

**४३. घोणोन्नतं मुखमपाङ्गविशालनेत्रं नैतद्धि भाजनमकारणदूषणानाम् ।**

**नागेषु गोषु तुरगेषु तथा नरेषु नह्याकृतिः सुसदृशं विजहाति वृत्तम् ॥९/१६**

अन्वयः – घोणोन्नतम् अपाङ्गविशालनेत्रम् एतत् मुखं हि अकारणदूषणानां भाजनं न (यतः) नागेषु गोषु तुरगेषु तथा नरेषु आकृतिः सुसदृशं वृत्तं नहि विजहाति ।

पदार्थः – घोणोन्नतं - घोणा नासिका उन्नता उद्‌गता यस्मिन् तत्, अपाङ्गविशालनेत्रम् - अपाङ्गयोः नेत्रान्तयोः विशाले दीर्घे नयने यस्मिन् तत्, एतत् - पुरोवर्तमानम्, मुखं - चारुदत्तस्याननम्, हि - निश्चयेन, अकारणदूषणानाम् - अकारणेन हठेन दूषणानाम् आरोपितानाम् अपराधानाम्, भाजनं - पात्रम्, न - नहि, भवितुमर्हतीति योजनीयम् । (यतः) नागेषु - गजेषु, गोषु - धेनुषु, तुरगेषु - अश्वेषु, तथा - च, नरेषु - मनुष्येषु, आकृतिः - आकारः, सुसदृशम् - अनुरूपम्, वृत्तम् - आचरणम्, नहि - नैव, विजहाति - त्यजति । दीपक अर्थान्तरन्याश्चालङ्कारौ । वसन्ततिलकाच्छन्दः ।

भावार्थः – चारुदत्तं निरीक्ष्य अधिकरणिकस्तस्य वर्णनं स्वगतं करोति – ऊर्ध्वङ्गतनासिकां अपाङ्गविशालनेत्रं एतत् अभियुक्तचारुदत्तस्य मुखं निर्हेतुकापराधानां पात्रं न भवति । गजेषु धेनुषु वृषभेषु घोटकेषु तथा मनुष्येषु आकृतिः स्वानुरूपम् आचरणं नैव त्यजति ।

**४४. कृत्वा समुद्रमुदकोच्छ्रयमात्रशेषं दत्तानि येन हि धनान्यनपेक्षितानि ।**

**स श्रेयसां कथमिवैकनिधिर्महात्मा पापं करिष्यति धनार्थमवैरिजुष्टम् ॥९/२२**

अन्वयः – हि येन समुद्रम् उदकोच्छ्रयमात्रशेषं कृत्वा अनपेक्षितानि धनानि दत्तानि श्रेयसाम् एकनिधिः सः महात्मा धनार्थम् अवैरिजुष्टं पापं कथमिव करिष्यति ।

पदार्थः – हि - यतः, येन - पूर्वोक्तेन चारुदत्तेन, समुद्रं - सागरम्, उदकोच्छ्रयमात्रशेषं - उदकस्य जलस्य उच्छ्रयः उच्चता तन्मात्रम् तदेव शेषः अवशिष्टम् यस्य तम्, कृत्वा - विधाय, अनपेक्षितानि - अनभिलषितानि, धनानि - अर्थाः, दत्तानि - अर्पितानि, श्रेयसां - पुण्यानाम् एकनिधिः - अद्वितीयाश्रयः, सः - पूर्वोक्तः, महात्मा - महाशयः चारुदत्तः, धनार्थं - वित्तार्थम्, अवैरिजुष्टं - अशत्रुसेवितम्, पापम् - अपराधम्, कथमिव - केन प्रकारेण, करिष्यति - विधास्यति । अतिशयोक्तिरलङ्कारः । वसन्ततिलकाच्छन्दः ।

भावार्थः – चारुदत्तस्य प्रशंसा कुर्वन् अधिकरणिकः कथयति - येन चारुदत्तेन समुद्रोद्‌भूतसर्वरत्नानि निःस्पृहभावेन सर्वाणि धनानि याचकेभ्यो समर्पितानि । कल्याणानां एकमात्राश्रयः सः महानुभवः महनीयचरितः चारुदत्तः धनापहरणार्थं शत्रुणामपि न सेवितं नारीवधरूपं कुकर्म केन प्रकारेण करिष्यति ?

**४५. यथैव पुष्पं प्रथमे विकाशे समेत्य पातुं मधुपाः पतन्ति ।**

**एवं मनुष्यस्य विपत्तिकाले छिद्रेष्वनर्था बहुलीभवन्ति ॥९/२६**

अन्वयः – यथैव प्रथमे विकाशे पुष्पं पातुं भ्रमराः समेत्य पतन्ति एवं मनुष्यस्य विपत्तिकाले छिद्रेषु अनर्थाः बहुलीभवन्ति ।

पदार्थः – यथैव - येन प्रकारेण, प्रथमे - प्रारम्भिके, विकाशे - उन्मेषे, पुष्पं - कुसुमम्, आस्वादितुम्, भ्रमराः - मधुकराः, समेत्य - एकत्रीभूय, पतन्ति - वेगपूर्वकमायान्ति । एवम् - अनेन प्रकारेण, मनुष्यस्य - जनस्य, विपत्तिकाले - आपत्तिसमये, छिद्रेषु - रन्ध्रेषु, दोषेष्वित्यर्थः, अनर्थाः - विपत्तयः, बहुलीभवन्ति - विस्तृता जायन्ते । अप्रस्तुतप्रशंसालङ्कारः । उपजातिश्छन्दः ।

भावार्थः – मानवस्य दैन्यकाले आपदः चतुर्दिग्भ्यः आपतन्ति इति चारुदत्तः कथयति – येन प्रकारेण प्रथमे विकशनावसरे कुसुमम् आस्वादयितुं भ्रमराः ऐक्यबद्धाः सन्तः आक्राम्यन्ति । तथैव मानवस्य आपत्तिसमये रन्ध्रेषु विपत्तयः बहुलीभवन्ति ।

## दशमोऽङ्कः

४६. अमी हि वस्त्रान्तनिरुद्धवक्त्राः प्रयान्ति मे दूरतरं वयस्याः ।

परोऽपि बन्धुः समसंस्थितस्य मित्रं न कश्चिद्विषमस्थितस्य ॥१०/१६

अन्वयः – अमी मे वयस्याः वस्त्रान्तनिरुद्धवक्त्राः दूरतरं प्रयान्ति, हि सुख संस्थितस्य परः अपि बन्धुः (जायते किन्तु) विषमस्थितस्य कश्चित् मित्रं न (भवति)

पदार्थः – अमी - पुरो दृश्यमानाः, मे - मम, चारुदत्तस्येति भावः । वयस्याः - सहृदयः, वस्त्रान्तनिरुद्धवक्त्राः - वस्त्रस्य - पटस्य, अन्तभागेन, निरुद्धानि - आच्छादितानि, वस्त्राणि यैस्तादृशाः, सन्तः, दूरतरम् - अतिदूरम्, प्रयान्ति - पलायन्ते, हि - यतः, सुखे - सुखावस्थायाम्, संस्थितस्य - विद्यमानस्य, परः - असम्बन्धी, अपि, बन्धु - आत्मीयः, जायते । किन्तु विषमे - विषमावस्थायाम्, स्थितस्य - विद्यमानस्य, कश्चिद् - कोऽपि, मित्रम् - वयस्यः, न - नहि, भवति । श्लोकेऽस्मिन् अप्रस्तुतप्रशंसालङ्कारः, आर्यावृत्तम् ।

भावार्थः – दुःखस्य बन्धुः कोऽपि न भवतीति विषये प्राणदण्डेन दण्डितः चारुदत्तः सखेदं कथयति – अमी पुरो दृश्यमानाः मम मित्राणि वस्त्रपटान्तेन स्वमुखम् आच्छादयन्तः अतिदूरं पलायन्ते । यतो हि सुखावस्थायां जनस्य परः अपि आत्मीयः जायते । परन्तु दुःखावस्थायां जनस्य कोऽपि जनः बन्धुः न भवति ।